P15,Cxl;g
JO

मात्राशास्त्रम्



प्राप्तिस्थानम्—
कांकरिया-पथस्थं वेदमन्दिरम्।
अहमदाबादे

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

015, Cxd:9
J0
4033
Chandracharyam
Matrashastram

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रीमदुदासीनसम्प्रदायाचार्यजगद्गुरु-

श्रीचन्द्राचार्यविरचितम्

मात्राशास्त्रम्

श्रीमदुदास्यत्वारसस्थापकनिर्वाण-

प्रियतमदासकृतसंस्कृतानुवाद-

सहितम्

श्रीयोगीन्द्रमङ्गृहीतश्रुतिसंवादिनीयुक्तया

श्रीमत्सम्पादकरामस्वरूपविरचितया

भावप्रसादिन्या

समलङ्कृतम्

वेददर्शनाचार्यमहामण्डलेश्वरश्रीमद्गङ्गेश्वरानन्द-

प्रकाशितम् ।

प्रथमावृत्तिः	सम्वत्	मूल्यम्
१०००	२००७	१)

4035

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

P15;C2L:g
J0

❀ संस्मरणम् ❀

अग्रणीः सम्प्रदायस्य, निष्णातो वेददर्शने ।
स्वामी गङ्गेश्वरानन्दो, धन्यवादमर्हति ॥
निखिलं मुद्रणव्ययं, मादिपत् पुण्यस्मृतिनिमित्तं च ।
प्रातः स्मरणीयानां, गुरुरामानन्दचरणानाम ॥
सप्रपञ्चामिमां मात्रां, परिच्छेदपुरस्सराम् ।
कर्त्तुं शक्तो न विद्वित्वा, दिति चेखिद्यते मनः ॥
पुण्यस्मरण इच्छते, हिन्दीभाषायुतामिमाम ।
सुविस्तृतां करिष्येहं, तूर्णमित्याशृणोत्ययम ॥

योगीन्द्रः

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY.
Jangamwadi Math, VARANASI,
Acc. No. 2838
4033

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ॐ

नम आचार्यचरणेभ्यः

मात्रास्पर्शोऽप्यसस्पर्शी, यत् कृपामात्रतो भवेत्

ब्रह्मशैवधिञ्जुषां, तां मात्रां मातरं नुमः ॥ १ ॥

मान्याः ! आरम्भतोऽद्यावधि जागतिकोच्चावचक्रमत्रिविक्रमप्रकीर्ण-विभ्रमा प्रकृतिनटी रंगस्थलीं समासेदुषां चेतांसि दोलान्दोलनमादधती व्यामोहयतीवापस्मारयतीव ।

अध्यात्माधिभौतिक दुर्धर्षसंघर्षोत्थामर्षापगतम्मतिस्तत्त्वाकांक्षयव्यामुग्धचेता सचेता अपि क्षणं "न जाने संसारः किममृतमयः किं विषमयः" इतितरंगिनिहरिभर्तृहरिवाक्यं स्मारं स्मारं कान्दिशीक इव जीवनसङ्ग्रामापरपार्थसारथिं सत्यसन्धं गुरुमुपसृत्य श्लथद्भारतिनिजामार्तिं व्यनक्ति--

'न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः'।

भूताविभूतभौतिकघटाटोपपरिजिहीर्षया, आविलविचारपाथः-पावनाय कतकरज इव त्रिदोषाक्रान्तविग्रहानुग्रहार्थं मल्लसिन्दूरादीवार्थिजनाभ्यर्थनापूरणपूर्णपात्रां मात्रामुपदिशति ब्रह्मसंस्थैकरहस्यविद्यां कलिपावनावतारा दाशकेन्द्रो भगवान् श्रीचन्द्रः ।

प्राकृतभाषानुबन्धिप्रश्नव्यूहनिराचिकीर्षया तथैवभाषयादर्तातरत् नैकविधपरिपाटीप्रारब्धत्रिपाठिशास्त्रार्थमहारथी जङ्गमवेदवेदांगमूर्त्तिर्भगवान् ! भाषाभूषादियाषाव्यामोहपारंगता मनीषिणो निजां सर्वतोमुखीमनुकम्पां सर्वतः सर्वथा प्रकटयन्तः समर्थयन्तीमामभियुक्तवाचम् ।

"नहि तरणिरुदीते दिक्पराधीनवृत्तिः"।

ब्रह्मसंस्थैकबृहत्संस्थामूलप्रतिष्ठातृभिरगाधविद्यावारिधिभिरुदासीन-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मर्यादानिर्वाणगजादिनैकविधग्रन्थनिर्मातृभिर्निर्वाणशिरोमणिप्रातःस्मरणीय-श्री 'प्रियतमदासमहाभागैः संस्कृतानुवादेन शंपाकम्प इव नैकविधार्थपरिचाय-केनोपबृंहिता'।

मात्रासूत्रानुबन्धैकमर्माणग्रन्थचमत्कृतिभूतां भावप्रसादिनीं श्लोका-त्मकवचनरचनामाचिन्वद्भिरुदासीनसार्वभौमैर्यावज्जीवं सम्प्रदायदायभागं रचनावचनलेखादिक्रमेण दायादैर्षु हरद्भिः सम्प्रदायजागरूकैः सम्पादक-प्रवरसर्वतंत्रस्वतंत्रस्वामिरामस्वरूपमहाभागैर्नूनमङ्गुलीयकरत्नसंयोग आयो-जितः।

सूत्रभाष्यप्रसादिन्यादिपरिवर्धिताऽपीयं मात्रापरपर्याया रहस्यविद्या सागरोन्मुखोनमुक्तवेलेव भागीरथी व्याकीर्णवेगा श्रुतिश्रुतिपथाह्लादं विगतापवादं सम्वादमभिलपन्तीव श्रुतिसंवादिन्या नैकविधभावगम्भीरया टीकया स्फुटमाटीकिता चिराय चमत्करोति सचेतसां चेतांसि।

एतट्टीकानिर्मातारो न्यायमीमांसाद्याचार्य्या विपश्चिदग्रेसराः साहि-त्यव्योम्नि नवोदीयमाननक्षत्रस्वरूपा सरस्वतीपुत्रैकपात्रतामाहरन्त उदासीनप्र-वरश्रीयोगीन्द्रानन्दाः। नामान्वर्थमहासमर्थमहापुरुषलिखितग्रन्थविषये भूमि-कामिमामालिखन् नूनं जिह्रेमि। प्रांशुलभ्ये फले लोभादिति कविगीतम-न्वाहरन् नितरां ह्रीणोऽप्युत्साहसन्नाहमादधानो भगवच्चरणारविन्दे ग्रन्थ-रत्नस्य साफल्यमीहमानः प्रार्थये यदनेन प्रीयतां विश्वात्मेति।

——:o:——

वे० आ० म० म० रामस्वरूपः

श्री गुरुमण्डलाश्रम

(हरिद्वार)

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रीमदुदासीनसम्प्रदायाचार्याः



जगद्गुरुश्रीश्रीचन्द्राचार्याः

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ॐ नमो ब्रह्मणे

अथ मात्राशास्त्रम्

* भावप्रसादिनी *

यद्रूपरूपणेऽनीशा, वाक्केशशेषकेशवाः ।
सन्त ईशा यदात्मान, स्तस्मै ब्रह्मण ओन्नमः ॥ १ ॥

* श्रुतिसंवादिनी *

"सहस्रधारके यस्मि, न्नृषयो नो मनीषिणः ।
पुनन्ति स्वं वच" "स्तस्मै, ज्येष्ठाय ब्रह्मणे नमः" ऋ० ६।७३।७
। अथ० १०।८।१

अथ मङ्गलालङ्करणैरलङ्करणीयेयं भगवती सूत्रधरा प्रसादिनी । निरन्तरायं प्रसादयिष्यति तत्सूत्रितम् । यत्सूत्रितं मात्रारहस्यं नामोदासीनाचार्यवर्यैः तान्यवरोहक्रमेण प्रवृत्तानीमानि नमोमङ्गलानि । तत्र पूर्वं परं ब्रह्म प्रणम्यते पूज्यपादेन प्रसादिनीकृता यद्रूपेत्यादि । वाक्=सरस्वती कः=ब्रह्मा "को ब्रह्मणि समीरात्मयमदक्षेषु भास्करे" इति मेदिनी, ईशः=शङ्करः, शेषः=अनन्तनागः, केशवः=विष्णुरेते समे सविशेषा यन्निर्विशेषस्य रूपनिरूपणेऽनीशाः=असमर्थाः सन्ति ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

किन्तु यदात्मानः=यत्स्वरूपाः सन्तः सन्तो यन्निरूपणे भृशं शक्तास्तस्मै ब्रह्मणे नमोवाद इत्यर्थः। "नहि निन्दे"तिनीत्या न निन्द्यन्तेऽत्र भगवन्तो धात्रादयो गृहमेधिनः; केवलं परिव्राजः सन्तः स्तूयन्ते यथा भगवति वेदे "यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति। यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः॥" (ऋ० ५।४४।१४) इति। यः परिव्राडत्र जागार=अविद्यानिद्रां त्यक्त्वो त्थितस्तमेवर्गादयो मन्त्राः कामयन्ते=स्वव्याख्यातृत्वेनोपयान्ति बिभ्यतो तरस्माद् "बिभेत्यल्पश्रुताद्वेद" इति वचनात्। किञ्चायं सोमः=उमया शक्त्या सह वर्तत इति सोम उमेशः परं ब्रह्म तमेव ज्ञानिनमाह यदहम्= परेशो न्योकाः=एकस्मिन्नेवोकसि त्वया सह निवसन् तव सख्ये=समान-ख्यापने परमसाम्ये स्थितोऽस्मीत्यर्थः। एवमन्यत्रापि श्रूयते "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनूं स्वाम्" (मु० ३।२।३) इत्यादाविति दिक्॥ १॥

आ० प्र० विघ्नग्रासासुरत्रास, जगद्भासस्मरासुष-
पञ्चास्याध्यासतद्ब्रह्म. शक्तिपञ्चकमाश्रये॥२॥
अप्पयांसीव हंसो यो, विमिश्रिते ऋतानृते।
विविच्य बोधयामास, तंनम्यः सादिमो गुरुः॥३॥
तल्लब्धौदास्यमार्गे य, आजीवनं स्थितः स्वयम।
अन्यांश्च स्थापयामास, वैधात्रं तं मुनिं नुमः॥४॥
श्रौतवंशे समुद्भूताः, श्रौतवंशेन दीक्षिताः।
श्रौतसिद्धान्तविस्ताराः, पान्तु श्रौतमुनीश्वराः॥५॥

श्रु० सं० पञ्चदेवा आश्रीयन्ते विघ्नेत्यादि। विघ्नग्रासः=गणेशः स हि विघ्नान्ग्रास्यति, असुरत्रासः=विष्णुः असुरान् त्रासयतीव्युत्पत्तेः;

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जगद्भासः=सूर्यः स हि जगद्भासयति स्मरासुषः=स्मरस्यासून्स्पतीति स महादेवः, पञ्चास्याध्यासा=पञ्चास्यमध्यास्ते सा भवानीत्येताः पञ्च शक्तयो ब्रह्मणस्ता आश्रये=समालम्ब इत्यर्थः ॥ २ ॥

उदासीनसम्प्रदायप्रवर्तको हंसावतारो नम्यते अप्पयासीवेत्यादि । अयं भावः प्राकृतो हंसो मिश्रिते नीरक्षीरे विविनक्तीत्यैतिह्यमात्रम् । श्रुतिविश्रुतस्तन्नामधरो हरिस्तु तथाभूते सत्यानृते पृथक्कृत्य यथा बोधयामास तथाद्यापि श्रौतमुनयोऽध्यक्षमीक्षन्त इति । कथं श्रुतिविश्रुतः ? शृणु "सहस्राण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् । स देवान्सर्वानुरस्युपपद्य संपश्यन्याति भुवनानि विश्वा" (अथ० १०।८।१८) इति । अस्यार्थः स्वर्गं पततः=स्वस्वरूपे विहरतोऽस्य हरेर्हंसस्य पक्षौ=ऋतानृतात्मकौ सहस्राण्यम्=अनन्तकालं यावद् वियतौ=विततौ स्तः । स सर्वान् देवानुरसि समुपपद्य=संस्थाप्य विश्वा=सर्वाणि भुवनानि संपश्यन् याति=परितः प्राप्नोतीति ॥ ३ ॥

सनत्कुमारः प्रणूयते तल्लब्धेत्यादि । तस्माद्धंसावताराल्लब्धो य औदास्यमार्गस्तस्मिन्नेव यावज्जीवं स्वयं स्थितोऽन्यांश्च नारदादीन् दीक्षयामास तं वैधात्रम्=विधातुरपत्यं सनत्कुमारं नुम इत्यर्थः ॥ ४ ॥

जात्या दीक्षया शिक्षया च सर्वथा नामार्थान्वय आविष्क्रियते श्रौतमुनिषु श्रीचन्द्राचार्येषु श्रौतवंशेनेत्यादि । एतद्घटयिष्यते ॥ ५ ॥

भा० प्र० हंससनत्कुमाराद्यां, श्रीचन्द्रगुरुमध्यमाम् ।
अस्मद्देशिकपर्यन्तां, वन्दे गुरुपरम्पराम् ॥६॥

निखिला श्रौतमुनिपरम्परा वन्द्यते हंसेत्यादि ॥ ६ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भा० प्र० कविकुलस्य कान्तो नो, नाचार्यो वेददर्शने ।
साङ्ख्ये योगे च वेदान्ते, न तीर्थो न च शास्त्र्यहम् ॥७॥
पदवाक्यप्रमाणाना, मुपाधिः कोऽपि नो मयि ।
अहमल्पश्रुतिर्जीवो, गौरवी गीर्बहुश्रुतिः ॥८॥
इयन्माना मतिर्मेऽस्ति, व्याख्यानानुपयोगिनी ।
प्लवेन बालभावेन, तितीर्षुरस्मि सागरम ॥९॥
यथामति गृणन्तो हि, न वाच्या इतिनीतितः ।
अनुगृह्णन्तु सन्तो ऽतो ऽसन्तः कामं हसन्तु हि ॥१०॥
यन्मात्रागुरुनुन्नोऽहं, मात्राव्याख्यान उद्यतः ।
उपालम्भोऽपि तस्यातः, सर्वं यत्तत्पदार्पितम् ॥ ११ ॥

"विद्या ददाति विनयमि" ति न्यायोऽनुष्ठियते कविकुलस्येत्यादि भिस्त्रिभिः। कान्तः=मनोहरः । पदम्=व्याकरणम् । वाक्यम्=मीमांसा । प्रमाणम्=न्यायः । गौरवी=जगद्गुरोः श्रीचन्द्राचार्यस्येयं मात्रात्मिका गीः, बहुश्रुतिः=अनन्तश्रुतिशोभिता । क्व तच्छब्दपारावारः क्वेयं स्वल्पसामर्थ्या मतिर्नौरिति भावः ॥ ७ ॥ ८ ॥ ९ ॥

श्रु० सं० सन्तोऽनुनीयन्तेऽसन्त उपेक्ष्यन्ते यथामतीत्यादि । "नभः पतन्त्यात्मसमं पतत्रिणः" इतिन्यायेन सर्वो यथासामर्थ्यं कुर्वन्नो पालभ्यते न्यायविद्भिः सत्यां न्यूनतायामपि । असन्तश्चान्यूनतायामपि हसन्त्येव कृतं तैरित्यर्थः ॥ १० ॥

यशोऽयशश्च सर्वं गुरुवे समर्प्यते यन्मात्रेत्यादि । "इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च" (ऋ० ८।६३।६)। तत्कुरुष्व मदर्पणम्" (गी० ९।२७) इति श्रुतिस्मृतिमानमत्र बोध्यम् । इन्द्रे=परमात्मनि विश्वा=सर्वाणि वीर्या=सामर्थ्यानि कृतानि कर्त्वानि=करिष्यमाणानि च समर्पितानि भवन्तीतिश्रुत्यर्थः ॥ ११॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

समीयुरेकदाऽमङ्क्या, भिन्नभिन्नमतानुगाः ।
ते सर्वे स्थापयामासुः, स्वैरं स्वं स्वं मत मुदा ॥ १२ ॥
ब्रह्मनिष्ठो गुरुः पृष्टः, श्रीचन्द्रः प्रास्य तन्मतम् ।
वक्तु प्रचक्रमे पूर्व, स्व मत देवभाषया ॥ १३ ॥
केषाञ्चिदनुरोधेन, भव्यभारतभाषया ।
परमुपादिशत्तत्त्व, शास्त्रं मात्राभिधानकम् ॥ १४ ॥

मात्रारहस्योपदेशप्रसङ्गः समीर्यते समीयुरित्यादिद्वाभ्याम् । सुगमम् ॥ १२ ॥ ॥ १३ ॥ ॥ १४ ॥

भा० प्र० उदासिनामिदं प्रेयः, प्रत्यहं यदधीयते ।
एतत्स्वाध्यायहीनो यः। सोदासीनो मतो नहि ॥ १५ ॥
मात्राशब्दः क्विबन्तो ना, मायाः संत्रायतेऽर्थतः ।
सुपि योगविभागेन, कः प्रत्ययोऽपि सम्मतः ॥ १६ ॥
स्त्रीत्वे टापि च शब्देऽस्मिन्नर्थोऽपि न विभिद्यते ।
अर्थान्तरं भवेद्व्यङ्ग्य-मित्यापि वार्यते न हि ॥ १७ ॥
मात्रातनूतनुत्वेऽनु-योगानां सुगमत्वतः ।
गुरुणा करुणार्द्रेणा-सूत्रि सूत्तरमत्र वै ॥ १८ ॥

श्रु० सं० अस्य परमोपादेयताप्रतिपाद्यते उदासीत्यादि ॥ १५ ॥ मात्राशब्दं साधयति मात्रेत्यादिद्वाभ्याम् । 'माया' इति मा प्रकृतिकं पञ्चम्यन्तम् ॥ १६ ॥ १७ ॥

प्रश्नोत्तरात्मकत्वादप्यत्र प्रश्नासूत्रणे कारणमाह मात्रातन्वित्यादि । मात्राशास्त्रकलेवरं शब्दतो मा बृंहीदितिकृत्वा प्रश्ना नोक्ताः सुगम्यत्वात् । दुरूहत्वादुत्तराण्येव सूत्रितानीति भावः ॥ १८ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भा० प्र० सङ्गतिरत्र सर्वत्र, सूत्राणां न निभाल्यताम् ।
वैविध्यमनुयोक्तृणां, हेतुमत्रावगच्छत ॥ १९ ॥
नैकजन्मार्जिताईन्तीं, समालोच्याधिकारतः ।
कन्थादिविविधं प्रोक्तं, पुनरुक्तिरतो न हि ॥ २० ॥
परिदधतु कन्थादीन्, यथा रुचि न वार्यते ।
तेषां तु मुक्त्यहेतुत्त्वं, गुरुणाऽत्र विबोध्यते ॥ २१ ॥
तत्वमस्यादिबोधादि, तत्स्थानेषूपदिश्यते ।
भवव्याधेर्निवृत्तिः स्या—न्नूनमात्यन्तिकी यतः । २२ ।
परोक्तं तु विहायात्र, स्वकीयार्थपदं, समम् ।
श्रौतं शास्त्रीयमुद्दिष्टं, सुगमं निर्विभक्तिकम् ॥ २३ ॥
निगमागमयोरास्था, तज्ज्ञताश्च दर्शिता ।
अनुकुर्युरुदासीना, इदमादिश्यते स्फुटम् ॥ २४ ॥

कुत्रचित्सूत्रेषु पौर्वापर्यसङ्गति र्नोपलभ्यते तत्कारणमाह सङ्गतिरित्यादि ॥ १९॥

"ज्ञानस्य कन्था" अकालः कन्थेत्यादौ पुनरुक्तिं समाधत्ते नैकेत्यादि । रोगानुरूपंपथ्यमिति न्यायेन पूर्वजन्मार्जितपुण्यतारतम्याद् योग्यतातारतम्यमालक्ष्योपदेशवैचित्र्य मिति भावः ॥ २० ॥

श्रु० सं० यदा ज्ञानादिरूपं कन्थादिकं धारितं तदा वस्त्रादिमयं त्याज्यमित्याशङ्कां निराकरोति परिदधत्वित्यादिद्वाभ्याम । कन्थादिपरिधाननिषेधे न तात्पर्यमपि तु भवव्याधिनिवर्तकं सपरिकरं ज्ञानमेव न तु वस्त्रमयं कन्थादिक, स्मर्यते हि "न लिङ्गं धर्मकारणम्" (मनु० ६।६६) "लिङ्गे सत्यपि खल्वस्मिन् ज्ञानमेव हि कारणम । निर्मोक्षायेह भूतानां लिङ्गग्रामो निरर्थकः" ॥ (नारद प० ४।३३) इति भावः ॥ २१ ॥ २२ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रु० सं० शास्त्रकारं प्रशंसति **परोक्तमित्यादिद्वाभ्याम्**। प्राश्निकमुखनिस्सृतानि गोदडयादीनि ग्राम्यानि पदानि यानि तानि तथैव निबद्धानि। स्वकीयानि ज्ञानादिपदानि तु शास्त्रीयाणि निर्विभक्तिकसंस्कृतसम्मतानि प्रयुक्तान्यत्राचार्यैः। एतेन निगमागमयोः स्वरसवाहिप्रवाहप्रेमातिशयो व्यज्यते। लोकोपकाराय सरलसरलैरेव पदैरिदं मात्रारहस्यं प्रतिपादितम्। सर्वैरुदासीनैरनुहरणीयोऽयमुदारभाव इति भावः। २३॥ २४॥

भा० प्र० **जन्मना श्रौतवंशोऽहं, नानकपूतसूक्तितः।**
गुर्वविनाशिशब्देन, श्रौतो मुनिश्च दीक्षया॥ २५॥
"निंगमागम का पन्था, चलाया" इतिवाक्यतः। (चलाया above: बता)
अस्म्यहं श्रौतसिद्धान्त, इयमुद्घोषणा गुरोः॥ २६॥
प्रयुक्ता गुरुणा साध्वी, कलामात्राचतुष्पदी।
चिरात्पाठार्थसौकर्ये, की लै के त्यादि वर्धितम॥२७॥
अतस्तत्तन्निरासाय, यदि यत्नो विधीयते।
परिवृत्तिगुरोः पाठे, भवेत्स्यां वाच्यतास्पदम्॥ २८॥

श्रु० स० यदुक्तं श्रौतवंशे समुद्भूता इत्यादि तदिदं घटयति **जन्मनेत्यादिद्वाभ्याम्**। श्रौतवंशः=वेदिवंशः। शेषं सुगमम्॥ २५॥ २६॥

एतद्ग्रन्थकाव्यप्रकारमाह **प्रयुक्तेत्यादिद्वाभ्याम्**। अयमाशयः—आचार्यैः सूत्रपदानि निर्मितानि तानि मिलित्वा 'चौपाई' इति हिन्दीभाषाप्रसिद्धकाव्यरूपतामपि निर्वहन्ति। तत्र क्वचिन्नियमभङ्गः कतिपयसम्बन्धक्रियादिपदवृद्धया समजनि। अर्थसौकर्याय च तानि ग्रथितानि। तेषां पृथक्करणेऽर्थबोधक्लेशः पाठान्यथात्वं बहुदोषारोपाश्च मयि स्युरिति यथावत् पठितमिति॥ २७॥ २८॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भा० प्र० शब्दाल्पतार्थबाहुल्य-विरोधासत्त्वसूत्रताः ।
सच्छ्रुतिसम्मतोऽर्थश्च, मात्रायां निखिला गुणाः ॥२६॥

श्रु० सं० प्रस्तुतग्रन्थगुणान् गृणाति शब्देत्यादि । श्रुतिसम्मतिं च तत्र तत्र दर्शयिष्ये ॥ २६ ॥

भा० प्र० अस्ति विद्वन्नयेऽनल्पं, मात्रोपनिषदन्तरम् ।
पदपदार्थसङ्घर्षे आद्या, पराऽतिशायिनी ॥ ३० ॥
मायाख्ये यथेष्टं स्या-न्मुक्तिः स्वमतसम्मता ।
उपनिषदुपस्थाप्या, त्वेकैवोपनिषण्णता ॥ ३१ ॥

श्रु० सं० नन्वेतद्ग्रन्थप्रतिपाद्या ब्रह्मविद्येति वो मतम्, तर्हि किमर्थं तद्वाचकमुपनिषत्पदं विहायात्र मात्रापदमुपात्तमित्याशङ्कामपनयति अस्तीत्यादिद्वाभ्याम् । मोक्षायाज्ञानं निवर्तनीयमिति समे संमन्वते तैर्थिकाः पश्चाज्ज्ञानी ज्ञेयरूपतामेति तत्समतां वेत्यादौ कलहायन्ते । उपनिषत्पदमपि योजयन्त्येव तत्र तत्र । एवं तत्पदं विवादास्पदतां न मुञ्चति । अतो मात्रापदेन सर्वसम्मताविद्यानिवृत्तित्तमां तामभिदधद्भिराचार्यैः पश्चात्तनो विवादो मुधेति संसूचितं, तत्र पुरुषव्यापारापेक्षाभावात् । अज्ञाननिवर्तनपर्यन्तमेव मुमुक्षवः साधनानुष्ठाने समर्थास्ततो व्यापारानपेक्षे स्वसंवेद्ये परतत्त्वे क्वनं कलुष कलिनेति हृदयम् ॥ ३० ॥ ३१ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ॐ

मू० कहुरे बाल ! किसने मूण्डा किसने मुण्डाया
किस का भेजा नगरी आया ॥ १ ॥

* संस्कृतानुवादः *

नत्वाहं श्रीमदाचार्यं, श्रीचन्द्रं तं निर्वाणदम् ।
अनुवदामि तच्छास्त्रं, हिन्दीभाषामजानते ॥

कथय रे बाल ! केन मुण्डितः केन मुण्डायितः केन प्रेषितो नगरीमायाः ॥ १ ॥

भा० प्र० कथय बाल ! रे ! केन, मुण्डितः के न बोधितः ।
केन प्रेषित आयास्त्वं, नगरीं पावनाद् वनात् ॥ १ ॥
अवज्ञातोऽपि बालादि—शब्दैर्मत्वा स्ववार्द्धकम् ।
प्रत्युवाच प्रसन्नः श्री—श्रीचन्द्रो मात्रया गिरा ॥ २ ॥

श्रु० सं० अथ प्रारिप्सितस्य मात्राशास्त्रस्य प्रश्नात्मिकां पातनिकामादावसुसूत्रन् तत्रभवन्तः श्रीचन्द्राचार्याः कथयेत्यादिना । तत्राश्चर्योऽस्य वक्तेत्यादिश्रुत्युक्तवक्तृश्रोतृदुर्लभतामाकलयतां कुतूहलिनां वृद्धानामयमाचार्यविषयकः प्रथमः प्रश्नः केन मुण्डित इति । केन लोकोत्तरेण श्रोत्रियेण ब्रह्मनिष्ठेन दीक्षितस्त्वमित्यर्थः । मुण्डनमत्र समग्रदीक्षोपलक्षणम् । गुरुशिष्ययोर्दुष्प्राप्यत्वमृचाप्युक्तम्, तथाहि—

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

"अत्र: परेण पितरं यो अस्यानुवेद पर एनावरेण ।
कवीयमानः क इह प्रवोचद्देवंमनः कुतो अधिप्रजातम्" ॥
(ऋ० १।१६४।१८)

अवः=अवरो जीवः परेण=परमात्मना योज्यः परः=परमात्मा एना=एनेन अवरेण=जीवेन योज्य इति योऽनुवेद । किञ्च अस्य= जगतः पितरम्=ईश्वरं योऽनुवेद स कवीयमानः=कविर्ब्रह्म तद्विवाचरन् कवींस्तत्त्वज्ञान् शिष्यानात्मन इच्छन वा क इह देवं प्रवोचत्=को विद्वानिह ब्रह्मविद्यायां प्रतिवेद्यं देवं परमात्मानं प्रवक्ष्यति ? नास्तीदृश उपदेष्टा सुलभ इति हृदयम् । श्रोतुरपि दुर्लभत्वमाह मनइति मनः= चित्तं कुतः=कस्मादनुष्ठानाद् अधि=अधिकं शुद्धं भवेत् । तच्छुद्धि- कारणनिष्कामकर्मादेर्दुरनुष्ठानत्वादधिकारी दुर्लभइति भाव इत्यात्मानन्द भाष्यम् ।

कल्पोऽप्येवमाह—

यो वेद देवं व्यतिहाररीत्या,
सोऽयं गुरुर्ब्रह्मसमः प्रसाध्यः !
पुण्यैरतो वक्तरि शिष्यभावं,
प्रायात् स शिष्ये सति वक्तृभावम् ॥

केन मुण्डायित इति प्रयोजकविषयो द्वितीयः प्रश्नः । मुण्डनं मुण्डः तमायितः प्रापितः इति यावत् । केनप्रेषित इति प्रेषकविषयस्तृतीयः प्रश्नः ।

तदेतत्प्रश्नत्रयं प्रमादिन्यां श्लोक्यते कथयेत्यादि । मुण्डायित इत्यस्याशयं प्राप्ताप्राप्तविवेकन्यायेनाह बोधित इति ।

यदुक्तं नगरीमायास्तत्राकाङ्क्षितमवधिमाह वनादिति । "पराचः

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कामाननुयन्ति बालः" इत्यादिश्रुतिश्रुताज्ञानवचनं बालशब्दं शोश्रूयमाणा वृद्धमेवावृद्धं मन्यमानास्तं वृद्धा अबुद्धैव जगद्गुरुमवजज्ञुः रे बाल! इत्यादिना तदिदमाह अवज्ञात इति। तथापि "कश्चिद्धीरः प्रत्यगात्मानमैक्षदिति" श्रुतेसिद्धं धैर्यं "अमृतस्येव चाकाङ्क्षेदवमानस्य सर्वदा" (मनु० २।१६२) इति स्मर्यमाणासहिष्णुत्वं चाचरन्तः प्रसन्नानना आचार्या अनुरूपमुत्तरं वितर्करित्याह प्रत्युवाचेति। प्रसन्न इति विशेषणेनाचार्यस्य शास्त्रार्थविजेतृत्वं परान्तस्तमोऽपनयत्तमत्वं च ध्वन्यते यतः खलु प्रसन्नश्चन्द्रो नक्षत्रमण्डलं मन्दाभं, कैरवचक्रवालान्तरालमलामसापसारणं च करोत्येव ॥ १ ॥

--:०:--

मू० सद्गुरु मूण्डा लेख मुण्डाया, गुरु का भेजा नगरी आया ॥ २ ॥

सं अ० सद्गुरुणा मुण्डितो लेखेन मुंण्डायितः गुरुणा प्रेषितो नगरीमायाम् ॥ २ ॥

भा० प्र० भावना प्राग्भवोत्थाथ, यदहर्विरजेद्विधिः।
मतात्र लेखशब्दस्य, तन्त्रेणार्थद्वयी गुरोः ॥ ३ ॥
तन्नुन्नमुपमन्न मां, यथाविधि स्वमुण्डितम।
सद्गुरुरुपदिश्येदं, नगरीं प्रैषयत्ततः ॥ ४ ॥

अ० सं० क्रमश उत्तरं वक्तुं प्रक्रमन्ते सद्गुरुणेति। सद्गुरुणा = अविनाशिगुरुणा मुण्डितः = दीक्षितोऽहमिति प्रथमस्योत्तरम्। लेखेन = अदृष्टेन श्रौतप्रव्रज्योपसत्तिविधिना वा मुण्डायितः = दीक्षाग्रहणाय प्रेरितः इति द्वितीयस्योत्तरम। शेषमुत्तरं तृतीयस्य तत् स्पष्टम्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

लेखशब्दस्यावृत्त्यार्थद्वयाभिधानपुरस्सरं सूत्रं व्याचष्टे प्रसादिन्यां भावनेत्यादिना । प्राग्भवोत्था=पूर्वजन्मार्जिता भावना=संस्कारोऽद्दष्टमिति यावत् । यदहर्विरजेद्विधिः="यदहरेव विरजेत्तदहरेव प्रव्रजेद्" (जाबालो० ४) इति विधिः । एतेन केनसूक्तोक्तानि प्रश्न-प्रतिवचनानि पर्यालोचितानि भवन्ति । "केन श्रोत्रियमाप्नोति," (अथ० १०।२।२०) इति तत्रत्यः प्रश्नः । उत्तरं तु "ब्रह्म श्रोत्रियमाप्नोति" (अथ १०।२।२१) इति । ब्रह्म=उपसदनादिविध्यात्मको वेदः, आचार्यमाप्नोति प्रापयतीत्यर्थः । ममुच्चित्य सूत्रार्थमाह तन्नुन्नेत्यादिना । ताभ्यां लेखशब्दार्थाभ्यां नुन्नं=प्रेरितमुपसन्नं स्वेन मुण्डितं मां गुरुरिदं वक्ष्यमाणमुपदिश्य नगरीं प्रैषयदित्यर्थः ।

अत्रेदं बोध्यम्—ईश्वरावतारोऽपि भगवानाचार्योऽत्र मुमुक्षुजन-शिक्षणाय व्यवहारमर्यादामनतिक्रामं पूर्वजन्मार्जितपुण्यादिकं स्वस्यारोप्यैव तथा व्यवहरति । यथा भगवान् कृष्णः "बहूनि मे व्यतीतानि जन्मा" नीति ॥ २ ॥

—:o:—

मू० चेतहु नगरी तारहु गाम, अलख पुरुष का सुमिरहु नाम ॥ ३ ॥

सं० आ० चेतयध्वं. नगरीस्तारयत ग्रामान्, अलक्षपुरुषस्य स्मरत नाम ॥ ३ ॥

भा० प्र० नगरीग्रामवास्तव्याँ—श्चेतय वत्स ! तारय ।
स्मर स्मारय चालक्ष—पूरुषनाम सन्ततम् ॥ ५ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

बोध्यतेऽनेन कर्तव्य–मुदासिनां शुभावहम् ।
भोजनाच्छादनादीनां, चिन्ता स्यान्न कदचान ॥ ६ ॥

श्रु० सं० देशिकानुशासनत्रयीं महामात्रां सूत्रयति चेतयध्वमित्यादि-ना । नगरीः=नागरिकान् चेतयध्वम्=बोधयध्वं, ग्रामान्=ग्राम्यान् तारय=संसारसागरात्पारं गमय । अयमाशयः— अनाद्यविद्योत्सङ्गे चिरनिद्राग्रस्ता दुःखपरम्परामनुबोभूयमाना मानवाःस्वचेतितारं कामयन्ते । श्रूयते हि "न उग्रं चेत्तारमधिराजमक्रत" (अथ० ५।३।१०) इति नः उग्रम्=वेदोपदेष्टारं (उच्यते सम्बध्यते वेदोपदेशेनेति व्युत्पत्तेः) चेत्तारम्—बोधयितारम अधिराजम्=ब्रह्मनिष्ठम् अक्रत=अकरोत् परमेश्वर इत्यर्थः । समर्थेनाचार्येण तारणीयाश्च तेऽवश्यम् । श्रूयते हि "वाजी न प्रीतो विशो वितारीत्" (ऋ० १।६६।५) इति । न=यथा प्रीतः= प्रसन्नो वाजी=समर्थो विद्वान् विशः=प्रजाः वितारीत्=वितारयतीत्यर्थः । वेदविदोऽपि प्रतिजानते ग्रामे ग्रामे वेदमुपदेष्टुं जनान् तारयितुं च "ये ग्रामाः यदरण्यं याः सभा अधिभूयाम । ये संग्रामाः समित-यस्तेषु चारु वदेम ते" ॥ (अथ० १२।१।५६) इति । हे वेदवाक् ! ग्रामादिषु सर्वत्र ते एव चारु=जगत्तारकं यशो वदेमेत्यर्थः । न केवलं प्रतिश्रृण्वन्त्यपितु जनान् समुत्साहयन्ति ।

"अश्मन्वती रीयते संरभध्वमुत्तिष्ठत प्रतरता सखायः ।
अत्रा जहाम ये असन्नशेवाः शिवान्वयमुत्तरेमाभिवाजान्"

(ऋ० १०।५३।८) इति । सखायः=हे सहचराः ! इयम् अश्मन्वती=अनन्तापत्पाषाणमयी संसृतिसरिद् रीयते=प्रवहति । यूयं संरभध्वम्=मया सहसंसृज्यध्वम् आ+उतिष्ठत प्रतरत । अत्र ये पदार्थाः अशेवाः=भयप्रदास्तरणप्रतिबन्धका असन्=सन्ति तान् वयं सर्वे जहाम=

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अपजह्याम अथ च शिवान्=शुभान् तरणसहायकान वाजान्=पदार्थान अभि=अभिमुखं कृत्वा उत्तरेम=पारं गच्छेमेत्यर्थः। किं बहुना भगवान् वेदो विद्वांसमेव ग्रामादिरक्षकं वक्ति "ग्रामस्याविताभि"(ऋ० १।४४।१०)

हे अग्ने । जगन्नेतः ! त्वं जगतामविता=रक्षको ऽसि मोक्षविद्योपदेशेनेत्यर्थः। "तुरः तपस्वान् चिद् विश्वमर्णवद्" (अथ ५।२।८) इति। तुरः तपस्वान्=वेगवान् तपस्वी चिद्=निश्चयेन विश्वम् अर्णवत् पर्यटेज्जनबन्धनमोचनायेत्यर्थः इदं। सर्वमाकलय्य समर्थतममस्मदाचार्यं परमकारुणिकोऽविनाशिमुनिः समादिशात चेतयध्व नगरीस्तारयत ग्रामानिति कथं तत्सामर्थ्यमिहायते येन जनतारणादिकं शक्यते कर्तुमिति शङ्काया उत्तरम् "अलक्षपुरुषस्य स्मरत नामेति"। सूत्रं व्याचष्टे नगरीग्रामेत्यादिना। न केवलमलमलक्षनामस्मरणमिति तत्स्मारणमप्युपलक्षयतित्याह स्मारयेति। स्यादेतत्सर्वत्र चेतयध्वमित्यादिबहुवचनम् आचार्यप्रयुक्तं कथं सङ्गच्छतामित्याह बोध्यत इत्यादिना। आचार्यं पुरस्कृत्य समे श्रौतमुनय आज्ञाप्यन्ते परमगुरुणा न केवलमेकाकीति भावः। श्रौतमुनयो निश्चिन्ततां नीयन्ते भोजनेति। गीतमपि "भोजनाच्छादने चिन्तां वृथा कुर्वन्ति वैष्णवाः। योऽसौ विश्वम्भरो देवः स भक्तान् किमुपेक्षत" इति। मन्त्रोऽपि भवत्यत्र "सुगः पन्था अनृक्षरा आदित्यास ऋतं यते। नात्रावखादोऽस्ति वः" (ऋ० १।४१।४) इति।

आदित्यासः=हे विद्वांसः सन्मार्गोऽयं नात्र निन्द्यं भोजनं मिलत्यपि तु सुन्दरं सात्त्विकमिति भोजनचिन्ता न कार्येत्यर्थः॥ ३॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० गुरु अविनाशी खेल रचाया । अगम निगम का पन्थ बताया ॥ ४ ॥

सं० अ० गुरुरविनाशी खेलामरचयत् । निगमागमयोः पन्थानं चावो-धयत ॥ ४ ॥

भा० प्र० क्रीडामात्रं जगच्चक्रं,ऽविनाशी मे गुरुस्तथा ।
श्रौतमुपादिशन्मार्गं, पुराणं लब्धुमीश्वरम ॥ ७ ॥
छन्दोभङ्गभयान्नून-मागमे ह्रस्वता कृता ।
मान्योऽयं निगमाभ्यून, इत्यापि बोध्यते नयः ॥ ८ ॥
पूर्वंप्रयोगशङ्काया, उत्तरं तदनित्यता ।
क्लेशोऽधिकस्तु सन्धौ स्यात्, तद्रीत्यनवबोधिनाम् ॥९॥
अविनाशिगुरुः शब्द, आवृत्त्यार्थद्वयानुगः ।
एकः सर्वगुरुस्त्वादि-रन्योऽन्तिरदेशिकः ॥ १० ॥

अ० सं० "उत्पादकब्रह्मदात्रोर्गरीयान ब्रह्मदः पितेति" (मनु०-२।१४६)मनूक्त्याऽन्ते वक्ष्यमाणात्पितुरभ्यर्हिततरं विद्योपदेशिनं देशिक-मीश्वराभेदेन प्रस्तुवन्ति सूत्रकाराः गुरुरविनाशीत्यादि । अविनाशि-नामा दीक्षागुरुररचत् खेलाम्—लीलां जगत इत्यर्थः । कृष्णद्वैपायनो ऽप्याह "लोकवत्तु लीलाकैवल्यम् (ब्र० सू० २।१।३३) । अविना-शी तु तद्विद्धि येन सर्वमिदं ततम" (गी० २।१७) अक्षरात्सम्भ-वतीह विश्वम" (मु० १।१।७) इति । लोकवेदयोः पन्थानौ चावोच-दित्याह निगमागमेत्यादि । श्रुतिरप्येवमाह "यो ब्रह्माणं विदधाति पूर्वं योवै वेदांश्च प्रहिणोति तस्मै" (तै० सं० ३५ श्वे० ६।१८)

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

एतेन गुरुलक्षणमप्युक्तं प्रसङ्गात्, स्मर्यते हि "स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति" (याज्ञव० १।३४) । प्रसादन्या क्रीडेति । वेदोदितक्रीडापादितया खेलास्थाने क्रीडापदमुपात्तम् । तथा च मन्त्रः "पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परियातोऽर्णवम विश्वाऽन्यो भुवना विचष्ट ऋतूँरन्यो विदधज्जायसे नवः" (ऋ० १०।८५।१८) यथा कश्चिच्छिशुः क्रीडनकं कृत्वा लघुभ्रातरं क्रीडयन् क्रीडति, तथैवात्रेश्वरः क्रीडन् जीवं क्रीडयतीत्याम्नायते ।

अक्षरार्थस्तु--पूर्वापरं चरतः=पूर्वमीश्वरश्चरति पृष्ठतश्च जीवोऽनुचरति, एवंभूतावेतौ शिशू=तनूकृतस्वरूपौ (सूक्ष्माविति यावत) जीवेशौ मायया=मायाविद्याभ्यां क्रीडन्तौ अर्णवं=संसारसागरं परियातः=परिप्राप्नुतः । उभयोः क्रीडे विभजति विश्वेति । तयोरन्यः=ईश्वरः विश्वा=समस्तानि भुवना=भुवनानि विचष्टे=प्रकाशयति विरचयति वेतीयं क्रीडा परमात्मनः । अन्यः= जीवः, ऋतून् विदधत्=ऋत्वनुसारीणि कर्माणि कुर्वन् ऋत्वनुगमनं वा कुर्वन् नवः नूतनः (पुत्ररूपेण जायायां जायते "पिता वै जायते पुत्र' इति मानात्) जायसे=उत्पद्यते । जनिरत्र शैशवादेरप्युपलक्षकम) इय क्रीड़ा जीवस्य । सूक्तं प्रत्यभिज्ञायाम्—

जननशैशवयौवनवार्द्धक.--
व्ययमयैरखिलैरपि सन्धिभिः ।
अभिनयन्नपि पौरुषनाटकं,
परिणतौ स शिवोऽस्मि महानटः ॥

उत्तरार्धं व्याचष्टे श्रौतमित्यादि । अयमत्र निष्कर्षः—सन्ति बहवः पन्थानो यत्र मोमुह्यमानो जीवो देवं प्रार्थयति "ये पन्थानो"

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

बहवो देवयाना अन्तरा द्यावापृथिवी सञ्चरति । तेषामज्यानिं यतमो वहाति तस्मै मा देवा परिधत्तेह सर्वे" (अथ० ६।५५।१) इति । हे सर्वे देवा ! इह ये देवयाना=विद्वद्भिः सेव्या "विद्वांसो हि देवा" (श० ३।७।३।१०) इतिवचनात् । बहवः पन्थानः द्यावा-पृथिवी=द्यावापृथिव्योरन्तरा=मध्ये सञ्चरन्ति=प्रवृत्ताः सन्ति तेषां यतमः अज्यानिं=वृद्धिं निर्जरताम् अमरतां वा वहाति=प्रापयति तस्मै मा=मां परिधत्त=नयतेत्यर्थः । तत्र दयमाना देवा उपदिशन्ति :—

अयं पन्था अनुवित्तः पुराणो यतो देवा उदजायन्त विश्वे ।
अतश्चिदाजनिषीष्ट प्रवृद्धो मा मातरममुया पत्तवे कः ॥"
(ऋ० ४।१८।१) इति ।

अय पन्था=श्रौतमार्गः पुराणः सनातनः अनुवित्तः=गुरुपरम्परया लब्धः यतो=येन मार्गेण विश्वे देवाः=सर्वे विद्वांस उदजायन्त=उद्गताः, अतश्चित्=अनेनैव मार्गेण प्रवृद्धाः=वृद्धिं गता ब्रह्मरूपश्चा जिनषीष्ट=प्रादुर्भूयाज्जीवः । अमुया=अनेन मार्गेण गन्तारं मातरम्=माति ब्रह्मणीति माता जीवस्तं मुक्तं कः=कोऽपि पत्तवे=पातयितुं मा=न शक्नोति । यद्वा मातरं=सन्मार्गोपदेशनीं श्रुतिं कः कश्चित् मा पत्तवे=न पातयितुं प्रवर्तेत न विस्मरेदितियावत् ।

एनां निर्णीतां सरणिमनुश्रुत्य हृष्टो जीवः कृतज्ञतां कृतार्थत्वञ्च प्रकाशयति "त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि । अभूदु पारमेतवे पन्था ऋतस्य साधुया । अदर्शि विस्रुतिर्दिवः" (ऋ० १।४६।११) इति । पारमेतवे=संसारोदधेः पारमेतुम् ऋतस्य=सत्यः परमात्मा "सत्यं ह्येव ब्रह्म" (बृ०५।४।१) "स किलासि सत्यः" (ऋ० २।१२।१५) इति श्रुतेः तस्य साधुया=

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सरल: अभूदु=अभूदेव दिवः स्नुतिः=दिव्यस्रोतः (प्रकाशः) अपि व्यदर्शि=प्रत्यक्षीकृत इत्यर्थः ।

तदिदं सर्वं मनसिकृत्य प्रसादिन्यामुच्यते श्रौमुपादिशन्मार्गं, पुराणं लब्धुमीश्वरमिति । शेषाशेषात्र प्रसादिनी प्रसन्नैवेति नेह प्रतन्यते ॥ ४ ॥

मू० ज्ञान की गोदड़ी ॥ ५ ॥

सं० अ० ज्ञानं कन्था ॥ ५ ॥

भा० प्र० भेदविद्वेषविध्वंसि, ब्रह्म ब्रह्मणि संश्रितम् ।
ज्ञानानां वा वरं ज्ञानं, कन्था जाड्यापनोदनी ॥ ११ ॥

श्रु० सं० कदाचित् कुत्रचित्कैश्चिदेव शैत्यापनीतिकामैः कम्यते कन्था सिद्धानाम् । अस्माकं तु सर्वदा सर्वत्र सर्वैर्मर्त्यैर्नितान्तकमनीया कमनीया सेति साविष्कारं सूत्र्यते ज्ञानस्य कन्थेति । आत्मज्ञानमेव कन्थेत्यर्थः । सौत्रं ज्ञानसामान्यपदं किमिति विशेषत आत्मज्ञानमेवाहेति सन्देहापसारण-पुरस्सरं सूत्रं व्याचष्टे भेदेत्यादिना । भेदात्मकविद्वेषविध्वंसि=अद्वैतं ब्रह्म ब्रह्मणि=स्वमहिम्नि संश्रितमित्यात्मज्ञानमेव सर्वज्ञानानां वरमस्ति । स्मर्यते हि "सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् । तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः" (मनु० १२।८५) इति । तदेवास्माकं कन्था जाड्यम्=अज्ञानशैत्यमपनुदति महामोदं ददाति चेति भावः । भगवान बादरायणोऽप्यर्थानर्थदानहानकरमिदं सूत्रयाम्बभूव "पुरुषार्थोऽतः शब्दादिति बादरायणः" (ब्र० सू० ३।४) इति ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अतः=आत्मज्ञानात् पुरुषार्थः=दुःखत्रयनिवृत्तिः परमानन्दप्राप्तिश्च भवति। कुतः ? शब्दात्="य इत्तद्विदुस्तेऽमृतत्त्वमानशुः" (ऋ० १।१६४।३) इत्यादिवेदप्रमाणादिति बादरायणाचार्यो मन्यत इति तदर्थः ॥ ५ ॥

मू० खिमा की टोपी ॥ ६ ॥

सं० अ० क्षमोष्णीषिका । ॥ ६ ॥

भा० प्र० शीतोष्णमानमानादि, द्वन्द्वक्षमा तु टोपिका ॥

अ०सं० "ज्ञानस्याभरणं क्षमा" 'क्षमा शत्रौ च मित्रे च यतीनामेव भूषणमिति" भागवतादौ यदुच्यते तत्र सा न केवलं भूषणमपि तु शिरोभूषणमिति सूत्र्यते क्षमोष्णीषिकेति । क्षमा=प्रतीकारसामर्थ्येऽपि परावज्ञासहनं, स्मर्यते हि बृहस्पतिना "बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित् । न कुप्यति न वा हन्ति सा क्षमा परिकीर्तिता" इति । मानवेऽपि "अतिवादांस्तितिक्षेत नावमन्येत कञ्चनेति ।" इयमेव क्षमा मुनिभिरुष्णीषिकेव शिरसि धारणीयेत्याशयः । सर्वदुःखेषु द्वन्द्ववृन्दमसह्यतरमिति तत्सहनमेव क्षमेत्याशयवान् व्याचष्टे प्रसादिनीकारः शीतेत्यादिना । सुगमम् ॥ ६ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० यत का आड़बन्द ॥ ७ ॥

सं० अ० यतं काटबन्धः ॥ ७ ॥

भा० प्र० यतं क्रान्तं यमैर्भावे, तदर्थो नियमा यमाः।
कटीबन्धः स शास्त्रीय,ः करणाश्वनियामकः ॥ १२ ॥

श्रु० सं केचन विरक्ताः कटिसूत्रं परिधाय वयं कटिबद्धाः संवृत्ता विजेष्यामोऽवश्यं जगदित्यभिमन्वते । तेषां भ्रमो वार्यते यतं काटबन्ध इत्यनेन । यतयो भवन्तो यतेन कटिं बद्ध्वा जगज्जेतुं प्रभविष्यन्ति नापरथेति भावः । योगार्थं विभजन् व्याचष्टे यतं क्रान्तेत्यादि । शास्त्रीय इति । प्रमाणितं हि मनुना "इन्द्रियाणां विचरतां विषयेष्वपहारिषु । संयमे यत्नमातिष्ठेद्विद्वान् यन्तेव वाजिनाम् (२।८८) इति ॥ ७ ॥

मू० शील लिंगोटी ॥ ८ ॥

सं ० अ० शीलं कौपीनम् ॥ ८ ॥

भा० प्र० ब्रह्मण्यता तथा देव–पितृभक्तिश्च सौम्यता ।
परोपतापितासूया—शून्यता मृदुता तथा ॥ १३ ॥
अपारुष्यं च मैत्री च प्रियोक्तिश्च कृतज्ञता ।
शरण्यताऽथ कारुण्यं, प्रशान्तिश्चेति विश्रुतम् ॥१४॥
त्रयोदशविधं शीलं, हारीतमुनिनोदितम ।
मनूक्तं धर्ममूलं तत्, कौपीनं चित्तशान्तिदम ॥ १५ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रु० सं० कौपीनबन्धनमात्रेण नहि कश्चिद् धार्मिकः प्रामाणिको वा भवत्यपितु शीलाचरणैरिति सूच्यते शीलं कौपीनमिति । "शीलयन्ति मुनयः सुशीलतां" "शीलं परं भूषणम्" इत्यादिलौकिकपङ्क्तिषु परमस्तुत्यतां नीतमिदम् । वेदेऽपि शीलाननुष्ठाने महान् पश्चात्तापोऽनुश्रूयते "यत्किञ्चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिष" (ऋ० ७-८९।५) इति वरुण=हे सर्वपूज्य महेश ! यत् किञ्चेदं दुःशीलजातं मनुष्याः=प्राकृता मनुष्या वयं दैव्ये जने=दिव्यजनविषये चरामसि= चरामः अचित्ती=प्रमादिनः यत्ते धर्माः=मर्यादा युयोपिम=विलोपयामः, हे देव ! तस्मादेनसः नो मा रीरिषः=मास्मान् वधीरित्यर्थः । तस्माद्दुःशीलं विलाप्य सुशीलमनुपालयेत्कौपीनधारणवन्मुमुक्षुरित्याशयः । हारीतमुनिप्रोक्तशीलविशेषाननुश्लोकयन्सूत्रं विवृणोति ब्रह्मण्यतेत्यादिना ब्रह्मण्यता=ब्रह्मणि वेदे साधुता वेदवेत्तृत्वमिति यावत् परोपतापिताऽसूययोः शून्यता । शेषं प्रसन्नम् । मनूक्तमिति । वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्" (मनु० २।६) इत्यत्रेति भावः । पश्य, मुनयः सदाचारेणैव संसारं तितीर्षन्ति "चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण शुद्धेन पूता अतिपाप्मानम् अरातिं तरेम" (तै० ब्रा० ३।१२।३) इति ॥ ८ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० अकाल खिन्था ॥ ६ ॥

सं अ० अकालः कन्था ॥ ६ ॥

भा० प्र० कालस्य काल इत्युक्तं, यं माता कोऽपि न क्वचित्।
भूतो भावी भवन्नास्त्या, ऽऽत्मास्तीति धीस्तु कन्थिका ॥ १६ ॥

श्रु० सं० युष्माकं कन्था स्वल्पपरिणाहा सापि जाजर्राति नत्वस्माकमित्याहुः, अकालः कन्थेति । कालादिपरिच्छेदराहतः परमात्मैवास्माकं कन्थेत्यर्थः। कालशब्दोऽत्र मृत्युसमयोभयवचन इति बोध्यम्। अकाल इत्यस्यैव हेतुमुखेन विवरणं प्रसादिन्यां कालस्य काल इत्युक्तमिति। श्रुतिस्मृत्यादिष्विति शेषः। तथाहि :—"स विश्वकृद्विश्वविदात्मयोनिज्ञः कालकालः" (श्वे० ६।१६) "मृत्युर्यस्योपसेचनम्" (कठ० १।२।२४)। "कालः कलयतामहम्" (गी० १०।१६।)। "मृत्युः सर्वहरश्चाहम्" (गी० १०।२३) । "कालोऽस्मि" (गी० ११।२२) । "पूर्वेषामपि गुरुः कालेनानवच्छेदात्" (यो० सू० १।२६) इति। अयं भावः—यः कालस्यापि महाकालस्त कथंकारं कालः कवलीकरोतु परिच्छिन्तान्मिमीतां वेत्यकालः स इति। स्यादेतन्मा नाम मायि मायिमहेशः कालेन, केनचनान्येन मानायो भविष्यतीत्याह यमित्यादि । यमपरिमितं परमात्मनं कोऽपि क्वचिदपि मातुं न शक्नोतीति भावः। श्रूयतेऽपि च "परो मात्रया तन्वा वृधान नते महित्वमन्वश्नुवन्ति" (ऋ० ७।९९।१) हे ईश! परः=परस्त्वं=यतोऽमात्रया=मानातीतया तन्वा=स्वरूपेण वृधान ! वृद्धिं गत! ते महित्वं=महिमानं न अश्नुवन्ति=प्राप्नुवन्ति जानन्ति जना इत्यर्थः। किञ्च "न ते विष्णो! जायमानो न जातो देव! महिम्नः पारमन्तमाप" (ऋ० २।९९।२)। हे विष्णो! देव! ते महिम्नः पारमन्तम्=

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

पारं न जायमानो न जातः (जनः) आप=जगामेत्यर्थः आपि च के उ नु ते महिमानः समस्य अस्मत्पूर्वे ऋषयोऽन्तमापुः" (ऋ० १०।५४।३) हे अमित ! अस्मत्पूर्वे के ऋषय उ=कदानु ते समस्य=सर्वस्य महिमानः=महिम्नः अन्तमापुः ? अर्थात् न केऽपि महर्षयस्त्वां मातुं शेकुरित्यर्थः ।

कुतः कश्चिदपि कस्मिंश्चिदपि काले नैनं मातुमर्हतीत्याह—भूत इत्यादि । यतः खल्वयमनुच्छित्तिधर्मात्मा कालत्रयेण मनागपि न स्पृश्यतऽतो न कश्चनैनं विवक्तुमलमिति भावः । यदा कथमपि स वक्तुं न शक्यते तर्हि मौनमेवैकं शरणमित्यत आह आत्मास्तीति । आत्माऽस्तीति सत्तामात्रेण परमात्मानं व्यपदेदिश्यतां तत्रभवानलं मौनेनेति भावः । इयमेवात्मविषयिणी निश्चयात्मिका धीः कन्येति निराह इतीति ॥ ९ ॥

मू० निराश झोली ॥ १० ॥

सं० अ० निराशं दोली ॥ १० ॥

भा० प्र० एषणारहितं चेतो, भिक्षावस्त्रं सुनिर्मलम् ।

श्रु० सं० सद्भावना भोजनस्थाने निरूपयिष्यते तदनुरूपमतिस्वच्छं भिक्षाधारणवस्त्रं सूत्रयन्ति निराशं दोलीति । निराशम्=आशाशून्यम् मनो दोली=भिक्षावस्त्रमित्यर्थः । सूत्रं विवर्तयति एषणेत्यादिना । अयं

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भाव:—"पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति" (बृ० ३।५।१) इति श्रुतिर्भिक्षाचरणात्पूर्वमेषणात्रयशून्यं मनो विधेयमिति विदधाति। एतदेवाचार्यो रूपकव्याजेन व्याजहार। उक्तपाशत्रयनिवृत्तिश्चावश्यकी मोक्षाय। श्रूयते हि उदुत्तमं मुमुग्धि नो पिपाशं मध्यमं चृद् अत्र अधमानि जीवसे" (ऋ० १।२५।२१) इति। हे वरुण! नो जीवसे=जीवनाय मोक्षायेति यावत्। उत्तमं पाशं=लोकैषणारूपम् उन्मुमुग्धि=उन्मोचय मध्यमं=पुत्रैषणारूपं विचत्=विदारय अधमानि वित्तैषणारूपाणि अव=अधः क्षिपेत्यर्थः। यत्ते देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविमोक्यं यत्। तत् तेविष्याम्यायुषे वर्चसे बलायादोमदमन्नमद्धि प्रसूतः" (अथ० ६।३३।१) इति च। देवी निर्ऋतिः=अविद्या यद् यद् अविमोक्यम्=अभ्यायासमोचनीयं दाम ते ग्रीवासु आबबन्ध तत्तत् ते आयुषे बलाय वर्चसे विष्यामि=उन्मोचयामि आयुषे वित्तैषणाया मोचनं, बलाय पुत्रैषणायः, वर्चसे लोकैषणाया इति विशेषः। अधुना त्वं प्रसूतः=शुद्धरूपेणाविर्भूतः सन् अदो मदमन्नम्=अमृतमन्नम् अद्धि=भुङ्क्ष्वेत्ययं भाव:प्रसादिनीकाराणाम्॥ १०॥

मू० युक्ति का टोप॥ ११॥

सं० अ० युक्तिः शीर्षण्यम्॥॥ १७॥

भा० प्र० युक्तिर्योगः स्वरूपे स्वे, शीर्षण्यं मतमुत्तमम॥ १७॥

श्रु० सं० ज्ञानयोगौ समुच्चिचीषव आचार्या योगं रूपकभङ्ग्या विदधति युक्तिः शीर्षण्यमिति। व्याचष्टे युक्तिरित्याद्यर्धेन। युक्तिः=

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

योगो वृत्तिनिरोधस्तदेव शिरसि वर्तमानं शीर्षण्यमित्यर्थः। अयमभिप्रायः-यत्र ज्ञानकन्था तत्रावश्यं योगशीर्षण्येन भवितव्यमन्यथैकेन ज्ञानेन योगेन वा दुःसाध्यो भवेन्मोक्षः श्रूयते हि "योगहीनं कथं ज्ञानं मोक्षदं भवति ध्रुवम्। योगो हि ज्ञानहीनस्तु न क्षमो मोक्षकर्मणि ॥ तस्माज्ज्ञानं च योगं च मुमुक्षुर्दृढमभ्यसेत।"

अभ्यासक्रमश्चाम्नायते "यच्छेद्वाङ्मनसि प्राज्ञस्तद्यच्छेच्छान्त आत्मनि" (कठ० ३।१३)। "युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः" (ऋ० ५।८१।१) इत्यादौ विप्राः=विप्राति प्रपूरयति प्राणं वियति क्षिपति रेचयति वेति विप्रो योगी ते बृहतो विपश्चितः=सर्वविदो ब्रह्मणः प्राप्तये मनो=चित्तवृत्तिं धिय उत=प्राणांश्च युञ्जते=निरुन्धते इत्यर्थः। तस्माज्ज्ञानेन योगं समुच्चेतुमयं प्रयास इति सुस्थितम् ॥ ११ ॥

मू० गुरुमुखी बोली ॥ १२ ॥

सं० अ० गुरुमुखी वाणी ॥ १२ ॥

भा० प्र० करणापाटवभ्रान्ति—वञ्चनादोषहानतः।
वाणी सर्वगुरोर्वाणी, गुरुमुखविनिस्सृता ॥ १८ ॥
शास्त्रेतिहासमर्यादा—नभिज्ञैर्बुधमानिभिः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

गुरुमुखीगिरात्रान्य—दीया भाषावबुध्यते ॥१६ ॥
अन्तरं पण्डितम्मन्यै-रज्ञात्वा लिपिभाषयोः ।
बत ! लिप्यर्थशब्देन, मुधा वाणी विशिष्यते ॥ २० ॥
लिपिविशेषसंज्ञा चेद्, गुरुमुखा भवेन्ननु ।
नखमुखान्न संज्ञायां, ङ्यभावो नावहेल्यताम ॥ २१ ॥

श्रु० सं युष्माकं भाषा लोककल्पिताऽस्माकं त्वीश्वरनिःश्वासरूपा नादिनिधनेत्याहुः **गुरुमुखीवाणीति** । गुरुः=ईश्वरः "पूर्वेषामपि गुरुः ।" (यो० सू० १।१५) इति वचनात् तस्य मुखं यस्या इति गुरुमुखी गुरुमुखनिःश्वसिता वाणीयमस्माकं, "अस्य महतो भूतस्य निश्वसितमेतद्" (बृ० २।४।२०) इति श्रुतेरिति भावः । लोकवाणीताऽस्या बहुवैलक्षण्यमवद्योतयन्सूत्रं विवृणोति प्रसादितकरणेत्यादि । अयं भावः—स्वतो निरवद्योऽपि शब्दो दोषिपुरुषश्लेषाद्दोदुष्यत एव लौकिकः । अलौकिकेयं किल भगवती भ्रमप्रमादकरणापाटवविप्रलिप्सादिदोषानसंस्पृशन्ती प्रवहति मन्दाकिनीव धवलेति अत्र मन्त्रवर्णोऽपि भवति— "बृहस्पते प्रथमं वाचो अग्रं यत् प्रैरत नामधेयं दधानाः । यदेषां श्रेष्ठं यदरिप्रमासीत्प्रेणा तदेषां निहितं गुहाविः" (ऋ० १०।७१।१) इति । बृहस्पते= हे वेदाधिपते ! प्रथमम्=सृष्ट्युत्पत्तेः पूर्वं नामधेयं दधाना=पदार्थानां पृथक् पृथक् नामधेयं धित्समानाः (महर्षयः) यत्प्रैरत=यद्वचनमुदचारयन् तद् वाचः=सर्ववाणीनाम् अग्रं मूलम् (अस्ति) यत्= यस्माद् एषाम्=वचनानां मध्ये श्रेष्ठं यत्=यस्माच्च अरिप्रम्= भ्रमप्रमादादिदोषरहितमस्ति । तत्=प्रसिद्धं वेदवचनं प्रेणा= प्रेमपूर्वकम् एषाम्=महर्षीणां गुहा=बुद्धौ निहितं (त्वया) तदेव आविः- अविभूतं जगत्यामस्तीत्यर्थः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शब्दमर्यादानभिज्ञाः पण्डितम्मन्याः केचन "गुरुमुखी" इति शब्दं पञ्चनदीयभाषायाः संज्ञारूपं प्रलेपुस्तानुत्थाप्य शिक्षयति शास्त्रेत्यादिभिस्त्रिभिः ॥ १२ ॥

मू० धर्म का चोला ॥ १३ ॥

सं अ० धर्मश्चोलः ॥ १३ ॥

भा० प्र० श्रुत्युक्तः साम्यवादो मे, मान्यो धर्मोऽस्ति चोलकः।

श्रु० सं० चोलयति समुच्छ्रितं करोति यः स नामार्थान्वितो मे चोलो न तु वस्त्रविशेषमात्रम्। स चोन्नेता धर्म इत्याहु धर्मश्चोल इति। चोदनालक्षणोऽर्थोधर्मः" (जै० १।१।२) "यतोऽभ्युदयनिःश्रेयससिद्धिः-स धर्मः" (वै०द० १।१।२) "श्रेयस्साधनता ह्येषां नित्यं वेदात्प्रीयते ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः" (श्लो०वा० २/१४) इत्यादिसु सर्वेषु धर्मलक्षणवाक्येषु वेदो यं=श्रेयःसाधनं बोधयति स धर्म इत्युक्तं भवति। वेदश्च यज्ञं धर्ममाह यज्ञेन यज्ञमयजन्तदेवाः तानि धर्माणि प्रथमान्यासन। तेह नाकं महिमानः सचन्त यत्र पूर्वे साध्याःसन्ति देवाः" ॥ (ऋ०१।१६४।५०) इति। देवाः यज्ञेन=देवपूजासङ्गतिकरणादानैः यज्ञम्=यष्टव्यं विष्णुं (यज्ञो वै विष्णुरिति श्रुतेः) अयजन्त। तानि=यज्ञरूपाणि कर्माणि धर्माणि=धर्माः

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्रथमानि आसन् । ते धार्मिका देवाः नाकम्=सुखविशेषं ह=निश्चयेन सचन्ते=प्राप्नुवन्ति । यत्र=नाके पूर्वे साध्याः=साध्यं सिद्धिः साऽऽस्त्येषां ते सिद्धाः सन्ति=वर्तन्त इत्यर्थः ।

यज्ञस्वरूपं च निपुणतरं निर्णेष्यामि "यागो जङ्घोटे" त्यत्र । तत्र पूजादानयोरन्यत्राचार्यैरुक्तत्वादत्रत्यधर्मशब्दः सङ्गतिकरणमात्राभिप्रायक इत्याविष्क्रियते प्रसादिन्यां श्रुत्युक्तत्यादि । सङ्गतिकरणाख्यसाम्यवादे सन्ति श्रुतयः "एष स्वधर्मो विख्यातो यतीनां नियतात्मनाम् । निर्द्वन्द्वो नित्यसत्त्वस्थः सर्वत्र समदर्शनः" ॥ (ना० परि० ४।१३) दर्शनमत्र वादस्याप्युपलक्षणम् । "अज्येष्ठासो अकनिष्ठास" एते संभ्रातरो वावृधुः सौभागय । युवा पिता स्वपा रुद्रा एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः ॥" (ऋ० ५।६०।५ अस्यार्थस्तु वक्ष्यते । "संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् । देवा भागं यथा पूर्वे सञ्जानाना उपासते ॥ (ऋ० १०।१९१।२)। "समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषां । समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥ (ऋ० १०।१९१।२)। "समानी व आकूतिः समाना हृदयानि वः । समानमस्तु वो मनो यथा वः सुसहासति ॥" (ऋ० १०।१९१।४)। "समानी प्रपा सहवो अन्नभागः" (अथ० ३।३।६) इति आसामर्थस्तु :– (हेजनाः ! यथा पूर्वे संजानानाः=ज्ञानिनो देवा भागम्=भजनीयं साङ्घिकं धर्ममुपासते स्म (तथा यूयमपि) संगच्छध्वम्=संमिलित संवदध्वम्=संप्रवध्वं वो मनांसि संजानताम=समनिश्चयानि जायन्ताम् । एषां समानो मन्त्रः= एक

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

एव मूलमन्त्रः (स्यात्) समानी समितिः = एकैव सभा (भवेत्) समानं मनः सहचित्तम् = सम्मति वः = युष्मान् समानेन = एकेन हविषा = यज्ञकर्मणा साकं जुहोमि = जीवनं मरणं च करोमि । वः समानी आकूतिः = सङ्कल्पः (अस्तु) समाना = समानानि हृदयानि (सन्तु) वो मनः समानमस्तु यथा = येन वः = यूयं सह सु असति = मिलित्वा वसन्तु । समाना = एका प्रपा = पानीयशाला वः सह अन्नभागः = एकं पाकस्थानं भवेदिति ॥१३॥

मू० सत्य की सेली ॥१४॥

स० अ० सत्यं सेलिका ॥१४॥

आ० प्र० कर्मणा मनसा वाचा, सत्यं सुन्दरसेलिका ॥२२॥

श्रु० सं० सेल्यते गम्यते मोक्षाधिकारिमहात्माऽनेनेति व्युत्पत्तिमभिसंधाय मोक्षाधिकारमधिगमयितुं सेलिकेयं (औणोंपवीतं) धार्यते इति वो राद्धान्तः । अस्माभिस्तु सत्येनैव सत्याभिसन्धो ऽमृतत्वाधिकारी ज्ञायतेऽतः सत्यमेव सर्वथा सर्वदा संधार्यत इति सूच्यत आचार्यैः सत्यं सेलिकेति । सत्यं सत्येनैवाधिकारिणं जाबालं गौतमो मुनिः पर्यचेष्टेति श्रूयते "सत्यकामो ह जाबाल" इत्यारभ्य " **तं होवाच नैतदब्राह्मणो विवक्तुमर्हति** " इत्यन्तेन छान्दोग्यभागेन । अत एव देवाः सत्यमेवैकमाचरन्तः श्रूयन्ते " **एतद्धि वै देवा व्रतं चरन्ति यत्सत्यमिति** " (शत०

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

१।१।१।५) इति ।

तदेतत्सत्यं विभज्य व्याचष्टे प्रसादिनीकारः कर्मणीत्यादि । अयमाशयः—चेतस्युप्तं किञ्चित्सत्यमसत्यं वा वचसि पल्लवितं फलति कर्मणि । श्रूयते हि "यद् वाव पुरुषो मनसाभिगच्छति, यद् वाचा वदति तत्कर्मणि करोति" (तै० आ० १।२३) इति । अतोऽसत्यं समूलं निर्मूलयन्तः सन्तः सत्यमेव स्वान्ते वपन्तु तत्रभवन्तोऽमृतफलाभिलिप्सवस्तापसाः । समाज्ञापयति भगवान् वेदोऽप्येवं "न मनसा अनृतमभिगच्छेत्, न वदेत्, न कुर्यात्" (तै० आ० १।७।२)। "तस्मादनृतं न वदेत्" (ऐ० आ० २।३।६)। "ऋतमेव शश्वद् वदेत् सत्यं वै ऋतम्" (तै० सं० ६।३।६) इति। किं बहुना सत्यैकपक्षपाती परमेश्वरः सत्याभिरक्ष्यसत्यप्रहन्ता श्रूयते 'तयोः यत्सत्यं यतरद् ऋजीयः, तत् सोमो अवति हन्त्यासत्" (ऋ० ७।१०४।१२) तयोः वचसि सतोः सत्यासत्योर्मध्ये यत् सत्यं यतरत्=यत् ऋजीयः= निष्कपटं तत्=सत्यम् इत्=निश्चयेन सोमः=उमया शक्त्या सह वर्तत इति सोम उमेशः अवति=रक्षति । असत्=असत्यम् आहन्ति= नाशयति क्षिपति संसारेऽसत्यवादिनमित्यर्थः । "ऊतये सत्यं कृणोमि" (अथ० ४।१८।१)। "अहमस्मि प्रहन्ता सत्वध्वृतं वृजिनायन्तम्" (ऋ० १०।२७।१) इति । सत्यध्वृतं=सत्याभिद्रोहिणं वृजिनायन्तं= पापाचारम् अहम्=ईश्वरः प्रहन्ताऽस्मीत्यर्थः । सत्यार्जवादीन्येव साधनानि वेदविद्याधिकारिणधिगमयन्ति न जातुचित्कस्यचिदाडम्बरविशेषः । तस्मात्सूक्तं प्रसादिन्यां सत्यं सुन्दरसेलिकेति ॥१४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० मर्यादा मेखला लै गले मेली ॥१५॥

सं० अ० मर्यादा मेखला गले मेलिता ॥१५॥

भा० प्र० भ्रूणस्य ब्रह्मणो हत्या, परतल्पेषु सङ्गतिः ।
मृषोद्य पातक कृत्वा, दुष्कर्माणि पुनः पुनः ॥२३॥
पानं स्तेय च पापानि, सप्त तेषां निवृत्तयः ।
ऋड्निरुक्तोक्तमर्य्यादा, मेखला मेलिता गले ॥२४॥

अ० सं० सिद्धानां कफनीतिख्याताया मेखलाया अपरिधाने न काऽपि क्षतिर्महती। आस्माकीनायास्तु तस्या निमेषायाप्यपरिधाने महापापतापतापमेव नाप्नोत्यपितु मृत्युपाशे पतति पुनः पुनः इत्याहुराचार्या मर्यादेत्यादिना। ऋगुक्त मर्यादाभेदान् दर्शयन् सूत्रं व्याचष्टे भ्रूणस्येत्यादिना। गर्भहत्यादिसप्तमहापातकानां सप्तनिवृत्तय एव मर्यादास्तासामेकामपि भङ्क्त्वा मानवो दानवतामेति श्रूयते हि "सप्तमर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात्" (ऋ० १०।५।६) इति। कवयः= ऋषयः सप्त मर्यादाः ततक्षुः=रचयामासुस्तासामेकामपि योऽभ्यगात्= उल्लङ्घ्य वर्तेत स अंहुरः=पापीभवतीत्यर्थः। ताः सप्तमर्यादाः परिगणिता निरुक्ते "स्तेयं, तल्पारोहणं, ब्रह्महत्यां, भ्रूणहत्यां, सुरापानं, दुष्कृतस्य कर्मणः पुनः पुनः सेवां, पातकेऽनृतोद्यम" (नि० ६। २७) इति छांदोग्येऽपीमा दिग्दर्शिकयोक्ता "स्तेनो हिरण्यस्य सुरां पिवँश्च गुरोस्तल्पमावसन् ब्रह्महाच। एते पतन्ति चत्वारः पञ्चमश्चाचरँस्तैः" (छा० ५।१०।६) इति। ता मर्यादा ऋषिस्वसृत्वेनाम्नाता "सप्तस्वसृररुषीर्वावशानो विद्वान्मध्व उज्जभार दृशे कम्" (ऋ०।५।५) इति। वावशानः=वशी विद्वान्=ऋषिः अरुषीः=

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

अहिंसनीयाः मध्वः=मधुराः सप्तस्वसृः=सप्तमर्यादाख्या उज्जभार=पालितवान् कं दृशे=सुखरूपब्रह्मदर्शनायेत्यर्थः । सुखरूपो दृश्यतेऽपि सुमर्यादाभिः शृणु " ब्रह्मज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः " (अथ० ४।१।१) इति । पुरस्तात्प्रथमम्=सर्वतः पूर्वं ज्ञानम्=आविर्भूतं ब्रह्म सुरुचः सीमतः=प्रकाशकमर्यादाभिः वेनः=ऋषिः आवः=ददृश इत्यर्थः । अतएवैतासां मर्यादानां भञ्जने " पापमाहुर्यः स्वसारं निगच्छात् " (ऋ० १०।१०।१२) इति मन्त्रोक्तपापप्राप्तिरपि युक्ता भवति । मेखलाऽपि ऋषिस्वसृत्वेनाश्राविता " श्रद्धाया दुहिता तपसोऽधिजाता स्वसा ऋषीणां भूतकृतां बभूव । " सा नो मेखले मतिमाधेहि मेधामथो नो धेहि तप इन्द्रियं च " (अथ० ६।१३३।४) इति । हे मेखले त्वं श्रद्धाया दुहिता तपसो जाता भूतकृतां ऋषीणां स्वसा बभूव=बभूविथ नो मत्यादिकमाधेहीति तदर्थः । तदेवं संक्षेपः मर्यादा ऋषीणां स्वसा संपालनीया मेखलापीति विजयतेऽतिरोचकं रूपकं श्रौतं श्रौतमुनेः मर्यादा मेखलेतीति गूढाभिसन्धिः प्रसादिनीकृताम् । विश्वतोमुखे वेदे भगवति मेखलास्तुत्या काञ्चीमात्रं स्तूयते नान्यत्किञ्चिदितिवक्तुमशक्यत्वाद् मेखलावत् मेखलाऽस्माकमित्यपि वक्तुं शक्यत्वाच्च तयाऽपि सा स्तुता भवत्येवेति बोध्यम् ॥१५॥

मू० ध्यान का बटुआ ॥१६॥

सं० अ० ध्यानं बटुकम् ॥१६॥

भा० प्र० वृत्त्यन्तरं तु हित्वा यत्, सततमात्मचिन्तनम् ।
सुस्यूतं बटुकं तन्मे, सूचिधानादिधारणम् ॥१५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रु० सं० 'चित्रमस्माकमिदं कन्थावलम्बि वस्त्रपुटकं यस्मिन् सूचिधानादिकं बहूपकरणं सम्मातीति' सिद्धान्तमर्थोक्त्यैव तस्मादपि चित्रतरं मे वटुकं यस्मिन् सम्मात्यमितोऽपि जगतीपतिरित्याहुराचार्या ध्यानं बटुकमिति । सत्यमत्रैव सम्माति महेश्वरः शृणु "परित्वामग्ने पुरं विप्रं सहस्य धीमहि" (ऋग्० ७।७१।१) इति । हे सहस्य=सर्वशक्तिमन्! अग्ने! वयं पुरम्=पूर्णं विप्रम्=सर्वज्ञं त्वां परिधीमहि=परितोध्याने कुर्म इति तदर्थः ॥१६॥

मू० नृत्त का सूइदान ॥१७॥

सं० अ० नृत्तं सूचिधानम् ॥१७॥

भा० प्र० मदेन धनजात्यादे, र्नृत्तं हित्वा भवार्तिदम् ।
ईशमदेन नृत्तं तु, सूचिधानमभीष्टदम ॥२६॥

लोपे "कगच" सूत्रेण, हिन्दाविव च दे कृते ।
शब्दस्य सूचिधानस्य, सूईदानं प्रसिध्यति ॥२७॥

श्रु० सं० ध्यानमुक्तं तत्र रसानुभवमुचितरूपकव्याजेन दर्शयति नृत्तस्य सूचिधानमिति । यथा बटुके सूचिधानादिकं ते, मे तथा ध्याने नृत्तानुभव इतिभावः । हेयोपादेयनृत्तप्रदर्शनपुरस्परं सूत्रं व्याचष्टे मदेनेत्यादिना । अयं भावः द्विविधं नृत्तम् । एकं द्रविणदारोद्यानादिमदेरितं नृत्तं बन्धकृद्धेयम् । इतरल्लाकृतिवल्लवललितलीलोद्वेल्लितं मोक्षप्रदमुपादेयम् । तद्रसिका विहरन्तु भागवतरङ्गतरङ्गैः "नृत्यन्ति गायन्त्यनुशीलयन्त्यजं, भवन्ति तूष्णीं परमेत्य निर्वृताः ॥" (११।३।३२) । एवंव्रतः

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्वप्रियनामकीर्त्या, जातानुरागो द्रुतचित्त उच्चैः । हसत्यथो रोदिति रौति गाय-त्युन्मादवन्नृत्यति लोकबाह्यः ॥ ” (११।२।४०) इत्यादिभिः । गीतमपि चित्रं वैदिकानां ध्यायिनाम् “अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम ” (ऋ० १०।१७७) इति । नृत्यद्गोपं कुञ्जेऽपश्यमिति तस्याशयः । सूईदानपदं समर्यादं विधत्ते लोपेत्यादिना । कगचजतदपयवां प्रायो लोपः ” (२।२) इति प्राकृतसूत्रम् ॥१७॥

मू० ब्रह्म अञ्चला लै पहिरे सुजान ॥१८॥

सं० अ० ब्रह्माञ्चलं परिदधीत सुज्ञानः ॥१८॥

भा० प्र० बृहत्वान्निखिलाधारो—मेशस्तद्विश्वबोधनी ।
साङ्गोपाङ्गश्रुतिश्चेति, ब्रह्मशब्देन बोध्यते ॥२८॥
परिदधीत सुज्ञानो, ब्रह्मद्वयं सदञ्चलम् ।
परितो धारणं प्राहुस् , तदाज्ञापरिपालनम् ॥२६॥

श्रु० सं० साम्प्रदायिकानामञ्चलं योगक्षेमापेक्षं मलिनमशुद्धं जीर्णं च क्षोभवीति न त्वस्माकमित्याहुः ब्रह्माञ्चलमिति । ब्रह्मैवास्माकमञ्चलम्=वस्त्रविशेष इत्यर्थः । अस्य चोक्ता दोषाः श्रुत्यैव निरस्ताः, तथाहि—“ शं नः क्षेमे शमु योगे नो अस्तु ” (ऋ० १।८६।८) । “ स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् ” (यजु० ४०।८) इति ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

योगे क्षेमे च सुखमस्ति यतः स्वतः प्राप्तं सर्वविभ्रमलक्षणादिरहितमिति भावः। तत्र ब्रह्मशब्दस्तु नानार्थेषु श्रूयते—यथा "ब्रह्माङ्गूषं सदनं रोदस्योः" (ऋ० १।११७।१०)। "ब्रह्मजज्ञानं" (अथ० ४।१।१)। "सत्यं ज्ञानमनन्त ब्रह्म" (तै० २।१) इत्यादिषु सर्वाधारे ब्रह्मणि। "ब्रह्म च नो वसो स चेन्द्र यज्ञं च वर्धय" (ऋ० १।१०।४) इत्यादिषु ज्ञाने। "देवत्तं ब्रह्म गायत" (ऋ० १।३७।४) इत्यादिषु वेदे। "अयमात्मा ब्रह्म" (बृ० ४।४।५) इत्यादिषु विज्ञानात्मनि। "तपसा चीयते ब्रह्म" (मु० १।१८)। "मम योनिर्महद्ब्रह्म" (गी० १४।३) इत्यादिषु प्रकृतौ। "ब्रह्मद्विषे" (ऋ० १०।१२५।६) इत्यादिषु ब्राह्मण इति। अतो विचिकित्सा जायते किमभिप्रायोऽत्र ब्रह्मशब्द इति तत्राहुः सुज्ञान इति। अञ्चलस्थानीयं कतमद्ब्रह्मेति श्रौतो मुनिर्जानातीतिभावः। तदेव रहस्यं प्रकाश्यते प्रसादिन्यां बृहत्वादिस्यादि।

अयमभिसन्धिः—यथा परिधानीयमञ्चलं परिधातुरन्यदुपरिधारणीयं भवत्येवमत्र परिधातुर्जीवादन्यदुपरिधारणीयं यत्तदेव वाच्यम्। तत्र जीवब्राह्मणौ जीवादनन्यौ प्रकृतिश्च नोपरिधारणीया यतस्तस्या अधस्ताद्धारणं श्रूयते "स्वधा अवस्तात् प्रयतिः परस्तात्" (ऋ० १०।१२९।५) इति। स्वधा=स्वस्मिन् दधाति जगदिति स्वधा प्रकृतिः अवस्तात्=अधस्तात् प्रयतिः=प्रयतिता जीवः परस्ताद् वर्तत इत्यर्थः। ज्ञानं तु परमात्मस्वरूपमेवेति पारिशेष्याद्वेदस्तद्योनिश्च परमात्माऽत्रत्यब्रह्मपदास्पदमिति।

तयोरुपरिधारणीयतां निर्णयति परित इत्यादि भगवति वेदेऽपि तदाज्ञापरिधारणं तत्फलं चाम्नायते "स्तोता यत्तेऽनुव्रत उक्थान्यृतुथा दधे शुचिः पावक उच्यते सोऽद्भुतः" (ऋ० ८।१३।१) इति।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

हे ईश ! यत्=यः स्तोता=भक्तः अनुव्रतः=आज्ञापालकः ऋतुथा=यथासमयम् उक्थानि=पवित्राणि निदेशवचांसि धत्ते=परिपालयति सोऽद्भुतः=लोकोत्तरः शुचिः=पवित्रः पावकः=पवित्रयिता चोच्यत इतिभावः ॥१८॥

मू० बहुरंगी मोरछड़ निर्लेप विष्टी ॥१६॥

सं० अ० बहुरूपो मयूरच्छदो निर्लेपविष्टिः ॥१६॥

भा० प्र० मायाभिः पुरुरूपो यो, बहुवार श्रुतीरितः ।
इन्द्रो निर्लेपविष्टिः स, मयूरच्छद आश्रितः ॥२०॥

भु० सं० साधूनां मयूरच्छदगुच्छकं दर्शकेभ्य आह्लादबिन्दुमात्रं प्रयच्छतीव ! अस्माकं चारु चित्रं चामरं चामरं मर्त्यं करोति दर्शनमात्रेणेति महच्चित्रमाहु बहुरूपो मयूरच्छद इति । बहुरूपः परमात्मैवास्माकं मयूरच्छदः=मयूरपिच्छरचितं चामरमित्यर्थः । बहुरूपता चास्यैकस्य श्रुतिषु प्रसिद्धैव " इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः" (ऋ० १।१६४।४६) इति । अस्यार्थः--इन्द्रं परेशमाहुः "अहन्नहिं पर्वते शिश्रियाणम् " (ऋ० १।३२।२) इत्यादौ । वरुणं परेशमाहुः " शतं ते राजन् भिषज " (ऋ० १।२४।६) इत्यादौ । अग्निं परेशमाहुः " त्वमग्ने रुद्र " (ऋ० २।१।६) इत्यादौ । अथो=तथा दिव्यः=सूर्यस्तं परेशमाहुः " चित्रं देवानाम् " (ऋ० १।११५।१) इत्यादौ । स परेशो गरुत्मान् सुपर्ण इत्याहुः-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

" सौवर्णपक्षममितद्युतिमप्रमेयं,
छन्दोमयं विविधयज्ञतनुं वरेण्यम्।
पक्षौ बृहच्च भवतो रथवच्च यस्य,
तं वैनतेयमजरं प्रणमामि नित्यम्॥ इत्यादौ।

यमं परेशमाहुः " त्रिकद्रुकेभिः पतति " (ऋ० १०।१४।१६) इत्यादौ। मातरिश्वानं परेशमाहुः " आत्मा देवानां भुवनस्य गर्भः " (ऋ० १०।१६८।४) इत्यादाविति। कल्पेऽप्येवम्—

" इन्द्रादिशब्दा गुणयोगतो वा व्युत्पत्तितो वापि परेशमाहुः।
विप्रास्तदेकं बहुधा वदन्ति प्राज्ञास्तु नानापि सदेकमाहुः॥"

इति। कथं तथात्वेऽपि न विकारित्वमित्यतो व्यशिषन् निर्लेपविष्टिरिति। निर्लेपा विष्टिः प्रवेशो यस्य स। तथा च पद्मपलाशवन्निर्लिप्तोऽतोऽविकारीति भावः। सौत्रार्थं मन्त्रारूढं करोति प्रसादिनीकारो मायाभिरित्यादि। " रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शतादश॥" (ऋ. ६।४७।१८) इति सम्पूर्णो मन्त्रवर्णः। अस्यार्थस्तु इन्द्रः=परेश "इरां दृणातीति वा, इरां ददातीति वा, इरां दधातीति वा" (नि. १०।१।१८) इति वचनात्।

अस्य=जगतः तद्रूपम्=अव्यक्तं रूपं प्रतिचक्षणाय=प्रकाशनाय रूपं रूपं प्रतिरूपो बभूव=यथा सौर्यं तेजो जायमानघटाद्याकारतामापन्नो घटादीन् प्रकाशयति तथाऽयं परमात्मा प्रकृत्युपचितजगदाकारतामियात्। स्यादेतत् सौर्यं तेजो वस्त्वाकारतामनुहर्तुमर्हति प्रसृमरत्वाद्; अनेवंविधश्च परेशः कथं तथाकारतामुपैतीत्यत आह मायाभिरिति। मायासामर्थ्यं तु विदिततममेवेति नात्र कविभिः पराक्रान्ते किञ्चिद्वक्तव्यम्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मायाभिः = अचिन्त्याभिर्मायाशक्तिभिः पुरुरूपः = बहुरू ईयते । अस्य = परमात्मनः हरयः = शक्तयः शतादश = अनन्ता "बहूनि चानन्तानि च" (छां० २।५।१६) इतिश्रुतेः । न केवलमियमेव श्रुतिस्तस्य तथात्वे मानमपि तु भूयस्य इत्याह प्रसादिन्यां बहुवागमिति। तद्यथा—"अर्हन्निष्कं यजतं विश्वरूपम्" (ऋ० २।३३।१०)" "विश्वरूपोऽमृतानि तस्थौ" (ऋ० ३।३८।४) । "देवस्त्वष्टा सविता विश्वरूपः" (३।५५।१६) । "त्रिपाजस्यो वृषभो विश्वरूप" (ऋ० ३।५६।३) । "वृषभं चर्षणीनां विश्वरूपम" (ऋ० ३।६२।६) इति दिक् ॥१६॥

मू० निर्भव जङ्गडोरा ना को द्विष्टी ॥२०॥

सं० अ० निर्भयश्चामररज्जुर्न कोऽपि द्विष्टी ॥२०॥

भा० प्र० स्वपरभेदशून्यत्वा—च्छत्रुविरहताऽभया ।
स्थितिर्या हि स मे मान्यो, जङ्गडोरः सनातनः ॥३॥

श्रु० सं० उक्तचामरबन्धनी रज्जुर्निरूप्यते निर्भयश्चामररज्जुरिति। निर्भयः = ज्ञानी भक्तः स एव चामरबन्धनार्था रज्जुरित्यर्थः । युक्ततरमेतद् भक्तो ह्यनन्यया भक्त्या दामोदरं परिबध्नात्येव । शृणु विरौति भगवान्

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सदा मुक्तोऽपि बद्धोऽस्मि भक्तेषु स्नेहरज्जुभिः । अजितोऽपि जितोऽस्मि तैरवशोऽपि वशीकृतः ॥" इत्यदिपुराणादौ । निर्भयताया हेतुमाहुर्न कोऽपि द्विष्टीति । द्विषामभावो निर्भयताया हेतुरतोऽभयार्थं द्वेषबाधः प्रार्थ्यमानः श्रूयते "बाधतां द्वेषो अभयं कृणोतु" (ऋ० १०।१३१।६) इति । "यत इन्द्र भयामहे ततो नो अभयं कृधि । मघवञ्छग्धि तव तन्न ऊतिभिर्वि द्विषो विमृधो जहि ॥" (ऋ० ८।६१।१३) इति च । हे इन्द्र ! मामभयं कुरु तदर्थं हे मघवन् ! शग्धि=समर्थोऽसि तव ऊतिभिः=रक्षाभिर्नो द्विषः=शत्रून् मृधः=वञ्चकान् विजहीत्यर्थः ।

ज्ञानी परिव्राट् त्वभयं दत्त्वैव सर्वभूतेभ्यः परिव्रजितः सोऽकुतोभयः स्मर्यते "यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम् । तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ॥" (मनु० ६।४०) इति । वस्तुतः परमात्मरूपस्य ज्ञानिनः कालत्रयेऽपि द्वेषिसत्ता नास्ति पूर्वं भ्रममात्रमासीत्सोऽधुना निवृत्त इति हृदयं सूत्रकृतः श्रौतमुनेः । श्रूयते हि मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से" (१०.५४।२) इति । हे इन्द्र ! ईश्वररूपापन्न ! ज्ञानिन् ! ते यानि युद्धानि ऋषयः प्राहुस्तानि माया + इत् = भ्रममात्रम् । वस्तुतो यदाद्य ते शत्रुं न पश्यामस्तदा पूर्वमासीदिति का प्रत्याशा ? सर्वथा त्वं द्विट्शून्योऽभयोऽसीतिभावः ।

व्याचष्टे स्वपरेति । यस्य ज्ञानिनः स्वपरभेद एव नास्ति तस्य सुतरां शत्रुभावाभावः सुतमां भयाभावः । श्रुतिरप्याह "कस्माद्ध्यभैष्यद् द्वितीयाद्वै भयं भवति" (बृ० १।४।१) इति ॥२०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० जाप जंगोटा ॥२१॥

सं० अ० जापो जङ्गोटाः ॥२१॥

भा० प्र० यः कालेनानवच्छिन्नः, पूर्वेषां गुरुरीरितः ।
मान यस्यास्ति सार्वज्ञ्यं, निरतिशयमुत्तमम् ॥३२॥

तद्वाचकोम्पदस्यालं, जपो यः सार्थभावनः ।
जङ्गोटा स तु विज्ञेयः, ओमर्थभावभावनः ॥३३॥

जागो घञि यजेरादेः, यो जः प्राकृत उच्यते ।
जङ्गोटाः मेऽस्त्वनुष्ठानं, यागस्य स्वस्तिवर्त्मनः ॥३४॥

अ० सं० जङ्गोटाख्यां जङ्घागोपनीं श्रोणिवलितां कृत्तिं परिदधते केचन साम्प्रदायिकाः । तद्धारणमहिम्नैव निष्प्रत्यूहं प्रत्यगात्मदर्शनमभिमन्वते। तेषामभिमानमपनयन्त्याचार्या जापो जङ्गोटा इति । जपेनाखिलप्रत्यूह निवृत्तिः प्रत्यगात्मदर्शनं च भवति न जङ्गोटाधारणमात्रेणेत्यर्थः । "ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च" (यो० द० १।२६) इति वदन् भगवान् पतञ्जलिस्तत्र प्रमाणम् । ततः=जपाद् अन्तराया-णाम्=विघ्नानामभावः प्रत्यक्चेतनाधिगमः=शुद्धस्वात्मचैतन्याधिगमो भवतीति तत्सूत्रार्थः । विष्णुपुराणेऽप्येवं स्वाध्यायाद् योगमासीत, योगात्स्वाध्यायमानमेत । स्वाध्याययोगसम्पत्त्या. परमात्मा प्रकाशत"॥ इति । स्वाध्यायः=जपः "स्वाध्यायः स्याज्जप" इत्यमरः । जप्यार्थं जपार्थं च विशदयन् सूत्रं व्याचष्टे यः कालेनेत्यादि सार्धेन। एतेन प्रसादिनीभागेन "पूर्वेषामपि गुरुः कालेनानवच्छेदात्" (यो० द० १।२६)। "तज्जपस्तदर्थभावनम्" (यो० द० १।२८) इति सूत्रद्वयं व्याख्यातम् । मूले जापपदस्थाने क्वचिज्जागपदोपलब्धि-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्तत्स्वरूपं प्राकृतसमयेन साधयति जागेत्याद्यर्धेन । "आदेर्यो ज" इति प्राकृतसूत्रम् । यागशब्दार्थमाह यागर्स्थस्वस्तियत्स्मेन इति । यागार्थः स्वस्तिवत्र्मेतिव्यासः । अयं भावः—देवपूजासङ्गतिकरणदानार्थकस्य घञन्तस्य यजेः स्वरूपं याग इति । तदर्थीभूतं व्यापारत्रयं च स्वस्तिवर्त्मरूपत्वेन श्रूयते "स्वस्तिपन्थामनुचरेम सूर्याचन्द्रमसाविव । पुनर्ददता अघ्नता जानता सङ्गमेमहि" (ऋ० ५।५१।१५) इति । हे परमेश्वर ! वयं सूर्याचन्द्रमसाविव=पुष्पवन्ताविव स्वस्ति=कल्याणप्रद पन्थाम्=यागरूपं मार्गमनुचरेम=चरतो देवाननुचरेम। "यज्ञेन यज्ञमयजन्त देवा" इति श्रुतौ देवाचरणं द्रष्टव्यम् । सामान्येनोक्तं विशेषेणाह पुनरिति । पुनः=भूयो भूयः प्रतिदिनं प्रतिवसन्ताद्यृतु प्रतिसम्वत्सरमिति यावत् । ददता=आहुतिं दत्तवता अघ्नता=देवपूजार्थं पशूननालभमानेन जानता=सङ्गतिकरणादिस्वरूपं जानता यागिकेन सङ्गमेमहि=सङ्गतिं कुर्यामेत्यर्थः । अत्राघ्नतेतिविशेषणेन यागे हिंसानिषिद्धा प्रतिभाति तथा भारतभेरीनादः--"सुरा मत्स्या पशोर्मांसं द्विजातीनां वधस्तथा । धूर्तैः प्रवर्तितं यज्ञे नैतद्वेदेषु विद्यते" (महाभा० शा० २६५।६) इति ॥२१॥

मू० सिफत उडानी ॥२२॥

सं० अ० स्फीतिरुड्डयनी ॥२२॥

भा० प्र० स्फीतं ब्रह्मेति निश्चित्य, तद्रूपेणास्य संस्तुतिः ।
मनसो वृत्तिरेषा हि, शक्तिरुड्डयनी शुभा ॥३५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रु० सं० सिद्धाः स्वोड्डयन्या शक्त्या जडाकाश एवोड्डयन्ते वय तु तया चिदाकाशे रमामह इत्याहुः--स्फीतिरुड्डयनीति । स्फीतिः=ईशस्तुतिः यतः किल स्तुतयो वर्धयन्त्यो महेशं श्रूयन्ते "इन्द्रं विश्वा अवीवृधन्त् समुद्रव्यचसं गिरः" (ऋ० १।११।१)। विश्वा गिरः=सर्वाः स्तुतयः समुद्रव्यचसम्=व्यापकम् अवीवृधन्त् वर्धयन्तीत्यर्थः। "ऋतस्य प्रदिशो मां वर्धयन्ति" (ऋ० ८।१००।४) ऋतस्य प्रदिशः=सत्यवादिनो यथा मां महेन्द्रं वर्धयन्तीत्यर्थः। "इन्द्राय साम गायत विप्राय बृहते बृहत्" (ऋ० ८।९८।१) इत्यादौ। तस्मादियं स्फीतिः स्तुतिरुड्डयनी शक्तिर्यथाचिदाकाशे प्रकाशामहे। श्रूयते हि "रोचन्ते रोचना दिवि" (ऋ० १।६।१) स्तोतारः रोचनाः=प्रकाशमानाः सन्तः दिवि=चिदाकाशे रोचन्ते=विहरन्तीति भावः। मौखिकस्तुतिमात्रेण न किमपि सिद्धयत्यपितु तदर्थाकारा मनसो वृत्तिरप्यावश्यकीति ध्वनयन् व्याचष्टे स्फीतमित्यादि। स्फीतमित्यस्यैव विवरणं त्रह्मेति। शेषमवदातम् ॥२२॥

मू० सिंगीशब्द अनाहत गुरुवाणी ॥२३॥

सं० अ० श्रृङ्गीशब्दोऽनाहता गुरुवाणी

भा० प्र० सत्यसंकल्पसत्त्यस्य, वाणीमनाहतां गुरोः।
श्रुतिपरम्परायातां, श्रृङ्गीशब्दं विभावय ॥३६॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रु० म० यन्निगद्यते भवद्भिः 'भोजनसमये वादिता शृङ्गी (शृङ्गनिर्मित-वाद्यविशेषः) श्रुणात्यज्ञानगदमि' ति तदत्यल्पमुच्यते यतो ह्यनाद्यविद्या-निद्रानिद्रिता मर्त्या जागरिष्यन्ति चेत्तदा श्रुतिमातुर्हितकारिण्यैव वाण्येत्या-हुराचार्याः शृङ्गीत्यादि । अनाहता=अबाधिता नित्येति यावत् "वाचा विरूपनित्यया" (ऋ० ८।७५।६) इति लिङ्गात् । गुरु वाणी=ईश्वरनिश्वासरूपा वाणीत्यर्थः । कुतोऽनाहतेयमित्युच्यते प्रसा-दिन्यां 'सत्येत्यादि'। सत्यसङ्कल्पः=परमेश्वरः "भारूपः सत्यसङ्कल्पः" (छा० ३।१४।२) इति श्रुतेः । एवम्भूतस्यानाहतस्य गुरोर्वाण्यपि सुत-रामनाहतेत्युक्तं भवति । कथं प्राप्यते सेत्याह श्रुतीत्यादि । श्रवणपरम्पर-यैवाप्यते वेदवाणी। श्रूयते हि "यज्ञेन वाचः पदवीयमायन् ताम-न्वविन्दन् ऋषिषु प्रविष्टाम्" (ऋ० १०।७१।३) इति । यज्ञेन= विष्णुना वाचः=वेदवाण्याः पदवीयम्=मार्गम् आयन्=प्रापिताः (जनाः)। कथन्तां निवर्तयति तामित्यादि । ऋषिषु प्रविष्टाम्=आविर्भूतां अन्वविन्दन्=लभन्ते वैदिका इत्यर्थः । निरुक्तेऽपि निरुक्तं "साक्षा-त्कृतधर्माण ऋषयो बभूवुः तेऽवरेभ्योऽसाक्षात्कृतधर्मेभ्य उप-देशेन मन्त्रान् सम्प्रादुः" (नि० १।६।५) इति । अनुमितञ्च तौतातिके "वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम् । वेदाध्ययन-सामान्यादधुनाध्ययनं यथा" इति । परम्परा कदापि मोच्छिद-दित्युपदिशति भगवान् वेदः "यथेमां वाचं कल्याणीमावदानि जनेभ्य, ब्रह्मराजन्याभ्यां, शूद्राय चार्याय च, स्वाय चारणाय च, प्रियो देवानां दक्षिणायै दातुरिह भूयासम्, अयं मे कामः समृध्यतामुप मा अदो नमतु" (यजु० २६।२) इति ।

हे वेदविद ! यथा=येन प्रकारेणेमां कल्याणीं वाचं=वेदवाणीं जनेभ्यः=सर्वमनुष्येभ्य; आवदानि=समुपदिशानि तथा यूयमुपदिशत ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जनेभ्य इत्युक्तं विभजति ब्रह्मेत्यादि । ब्रह्मराजन्याभ्याम् अर्याय = वैश्याय शूद्राय स्वाय = स्वकीयाय च = तथा अरणाय = न रणः शब्दप्रमाणं विद्यते यस्य स तस्मै दस्यव इत्यर्थः किञ्च प्रियोऽहं देवानां दक्षिणायै दातुः = दक्षिणाया दातुः कर्मिणः इह = अस्मिन् जगति भूयासम् अयं मे कामः = अभिलाषः समृध्यतां = संवर्धतां अदः वेदवाक् मा उपनमतु = न व्यर्थतां प्राप्नोतु, तथा प्रयतध्वमित्यर्थः ।

अत्रकेचनानाहतवाणी = अनाहताख्यचक्रोद्भूता वाणी "अनाहतस्य शब्दस्य तस्य तस्य शब्दस्य यो ध्वनिरि" त्याद्युक्ता शृङ्गीस्थानेऽस्माकमिति व्याचचक्षिरे ॥ २३ ॥

मू॰ शर्म की मुद्रा ॥ २४ ॥

सं॰ अ॰　　शर्म मुद्रा ॥ २४ ॥

भा॰ प्र॰ कर्णमुद्राऽऽत्मरूपाप्तेः, शममुत्सुखमावहा ।
मत्वाऽत्र यावन शब्दं, शर्मार्थोऽसाम्प्रतं त्रपा ॥३७॥
गुरुणा हि स्वशब्देषु, देववाणी समीरिता ।

भु॰ सं॰ केचन तत्र भवन्तो योगिनः कर्णशष्कुलीं मध्यतो विदार्य तत्र निवेशितं स्थूलतरं कुण्डलं मुद्रापदेन व्यपदिशन्ति। किन्तु मुदं राति ददातीतिव्युत्पत्तिकं तत्पदं तस्मान्निष्फलविपुलक्लेशा-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

त्कुण्डलाद्विभ्यत्तद्दक्तु तात्रप्यतेऽतः शरण्या अस्मदाचार्याः शरणोन्मुखाय तत्पदार्थ निरतिशयानन्दसन्दोहशरणसरणिं निर्दिशन्तः कामपि लोकोत्तरां मुद्रां मुद्रयन्ति शर्मणो मुद्रेति। शृणाति समूलं दुःखं यत्तच्छर्मास्माकं मुद्रेत्यर्थः। शोभतेतरामियं कर्णेषु शोश्रूयमाणा "शर्म मे द्यौः शर्म मे पृथिवी शर्म विश्वमिदं जगत्। शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती" इति ग्रुप्रमुखाः सर्वे शर्म यच्छन्त्वित्यर्थः। कुतस्तत्वेयं मुद्राऽऽसाद्यत इति चेदाचार्येभ्य इतिब्रूमः। शृणु "ते अस्मभ्यं शर्म यं सन्नमृता मर्त्येभ्यः। बाधमाना अपद्विषः" (ऋ० १।६०।३) इति। द्विषः कामादि शत्रूनपबाधमाना अमृताः= ब्रह्मनिष्ठाः ते= आचार्या मर्त्येभ्यः= शिष्येभ्यः शर्म यंसन्= प्रयच्छन्तीति तदर्थः। इदं सर्वं हृदि कृत्वा सूत्रं व्याचष्टे कर्णेत्यादिना। शर्म= आत्मरूपाप्तेः सुखमावहा मुद्, अस्माकं कर्णमुद्रेति भावः। बहवोऽत्र व्याख्यातारः शर्मपदं लज्जार्थकर्माभिमन्यन्ते तेषामभिमानं निराचष्टे मत्त्वेत्यादिना। अत्र यावनम्=पारसीकं शर्मशब्दं मत्वेतितदर्थः। त्रपा=लज्जेति यदुच्यते तदसाम्प्रतम्=अयुक्तमित्यर्थः। अत्रैव हेतुमाह गुरुणेत्याद्यर्धेन। सत्यां गतावत्र देववाणीशब्दा अवगन्तव्या निगमागममार्गप्रतिज्ञानादिति भावः॥ २४॥

सू० शिव विभूता ॥ २५ ॥

सं० अ० शिवो विभूतिः ॥ २५ ॥

भा० प्र० शिवसङ्कल्पमित्युक्तो, विभूती राजते शुभा ॥ ३८ ॥

शु० सं बाह्यभस्मलेपनं बाला अपि कुर्वते न तेन कोऽपि विशेषो

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भवति। यया विभूत्या विशेषो भवति भार्या सैव विभुबुभूषुणा। ... त्याहुः शिवो विभूतिः। शिवः=शिवमस्ति यस्मिन् सङ्कल्पे स एवास्माकं विभूतिरान्तरीत्यर्थः। सूत्रं मन्त्रेण संवाद्यते प्रसादिन्या शिवे त्यादि। ते च मन्त्राः।

यज्जाग्रतो दूरमुदैति दैव तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेक तन्मे मनः शिवसङ्कल्पमस्तु ॥
येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु ॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्जोतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किंचन कर्म क्रियते तन्मेमनः शिवसङ्कल्पमस्तु ॥

येनेदं भूत भुवनं भविष्यत्परिगृहीतममृतेन सर्वम्।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥
यस्मिन्नृचः साम यजूंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः।
यस्मिंश्चित्तं सर्वमोत प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥

यजु० ३४।१-६॥

यत्=मनो दूरमुदैति=चक्षुराद्यपेक्षया दूरं गच्छति। दैवम्=देव आत्मा तस्य ग्राहकम्। ज्योतिषां ज्योतिः=इतरेन्द्रियाणां प्रवर्तकम् ॥ १ ॥ येन=मनसा। अपसः=कर्मिणः विदथेषु=ज्ञायमानेषु पदार्थेषु सत्सु। अपूर्वम्=न विद्यते पूर्वमिन्द्रियं यस्मात्तत्। यक्षम्=यष्टुं शक्तम्। अन्तः= अन्तःकरणम् ॥ २ ॥ प्रज्ञानम्=प्रकर्षेण

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ज्ञानजनकम् । अमृतम् = अमृतात्मज्ञानैकसाधनम् ॥३॥ सप्तहोता = होतृमैत्रावरुणादयः सप्तहोतारो यत्र स यज्ञः ॥४॥ चित्तम् = ज्ञानम् । ओतम् = प्रोतम् ॥५॥ नेनीयते = अत्यर्थमितस्ततो नयति । अभीशुभिः = प्रग्रहैः । हृत्प्रतिष्ठम् = हृदि प्रतिष्ठा यस्य तत् । अजिरम् = जरारहितम् । शिवसंकल्पम् = मांगलिकसङ्कल्पवत् ॥६॥ इति मन्त्राप्रसन्नपदार्थाः ॥२५॥

मू० हरिभक्ति मृगानी लै पहिरै गुरुपूता ॥२६॥

सं० अ० हरिभक्तिं मृगाजिनं लात्वा परिदधीत गुरुपूतः ॥२६॥

भा० प्र० गुरूपदेशपूतो ना, हरिभक्तिमृगाजिनम् ।
धारयेद्विश्वविख्यातं, भक्तिप्रियो हि माधवः ॥३६॥

श्रु० सं० अभिधेयसामान्यान्मृगाजिनं भक्तिरूपेण निरूपयन्त्याचार्या हरिभक्तिमित्यादि । कथमभिधेयसामान्यं ? शृणु मृग्यते योगिभिरिति मृगः = हरि स एवाज्यते प्राप्यतेऽनेनेति मृगाजिनं हरिभजनं हरिभक्तिमिति यावत् । सुकूजितं कविकोकिलेन । "अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते" (विक्रमो० १।१) हरिणाप्युक्तं "पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया" (गी० ८।२२) इति । "न पूज्यमानया भक्त्या भगवत्यखिलात्मनि । सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये ॥" (भा० ३।२५।२९) इति च । यद्वाऽजिनधारणमन्त्रगतविशेषणनवकयुक्ततया नवधाभक्तिम-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जिनाभेदेन निरूपयन्ति हरिभक्तिमित्यादि । अजिनधारणमन्त्रस्तु
विष्णोश्चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरं समृद्धम् अना-
हतस्य वसनं जरिष्णु परीदं वाज्यजिनं दधेयम ॥ (पा० गृ० सू०
२।२।११) इति । अत्रत्यानि विशेषणानि भजनाजिन एव सामञ्जस्यं
लभन्ते । तथा हि विष्णोश्चक्षुः = पूर्णपुरुषस्य दर्शकं निगाह व्यासो
भगवान् “ पश्यति पुरुषं पूर्णं मोक्षमाप्नोति यद्धिया ” (भा० १।
६।२३) इति । धरुणम् = धारकं भगवतः प्रापकमिति यावत् । बलीयः
= कर्मोपासनयोर्मध्ये बलवत्तरम् । तेजः = भगवत्प्रकाशकम् । यशस्वि =
भगवत्प्राप्तियशोभाक् । स्थविरम् = पुराणम् । समृद्धम् = आत्मप्राप्ति-
समृद्ध्या सम्पन्नम् । अनाहतस्य = अबाधितस्य परमात्मनो वसनम् =
निवासः “ मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद ” त्यदिवच-
नात् । जरिष्णु = अतिप्राचीनकालप्रवृत्तम् । विस्तरभयान्नात्र प्रतिपदार्थं
प्रमाणमुच्यते ॥२६॥

मू० संतोष सूत विवेक धागे ॥२७॥

सं० अ० संतोषः सूत्राणि, विवेकस्तन्तवः ॥२७॥

भा० प्र० तेन त्यक्तेन भुञ्जीथा, मा गृधः कस्य स्विद्धनम् ।
सन्तोषो यजुरुक्तोऽयं, सूत्राणि मान्त्रिकाणि मे । ४०
सदसतोर्विवेकस्तु, तन्तवस्तन्तुतानिनः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रु० सं० ज्ञानात्मिका कन्था कथिता। तदुपादानान्यातानवितानरूपाणि सूत्राणि सूच्यन्ते सन्तोषेत्यादिना। संतोष आतानरूपाणि, विवेकः=विवेकख्यातिर्वितानरूपाणि सूत्राणीति विवेकः। कथमितिचेच्छृणोतु सावधानो भवान्। यथा वस्त्रस्य कार्यं प्रावरणादिकं वस्तुतः सम्मिलितास्तदुपादानभूतास्तन्तवः साधयन्ति। तथैवात्र प्रकृते ज्ञानकार्यं परमसुखप्राप्तिं दुःखनिवृत्तिं चेमौ सन्तोषविवेकप्रत्ययौ निर्वर्तयतः। संतोषात्सुखं विवेकज्ञानाच्च दुःखहानं सूत्रयाम्बभूव भगवान् पतञ्जलिः "सन्तोषादनुत्तमसुखलाभः" (यो० २।४२) "विवेकख्यातिरविप्लवा हानोपायः" (यो० २।२६) इत्याभ्याम्। विवेकख्यातिः साधनं, ज्ञानं साध्यमिति ब्रूमोऽतो मा भूत्तयोरभेदाशङ्केति ज्ञेयम्। सन्तोषं व्याचष्टे तेनेत्यादित्रिपाद्या। "सन्तोषः=सन्निहितसाधनादधिकस्यानुपादित्सेति" भाष्यं, तन्मूलं च "तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्। (वा० यजु० ४०।१) इति मन्त्र इत्याशयः प्रसादिनीकृतः। विवेकं विशिनष्टि सदसतोरिति। आत्मानात्मविवेक इत्यर्थः ॥२७॥

मू० अनेक टली तहां लागे ॥२८॥

सं० अ० अनेके पटखण्डास्तत्र लग्नाः ॥२८॥

भा० प्र० तस्यां तु ज्ञानकन्थायां, संलग्नाः सात्त्विका गुणाः।
शमादयोऽतिशोभन्ते, वस्त्रखण्डा अनेकशः ॥४१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रु० सं० कन्थायां ग्रथितानि वस्त्रशकलानि स्मर्यन्ते "विशीर्णान्यमलान्येव चेलानि ग्रथितानि तु। कृत्वा कन्थां बहिर्वासो धारयेद्धातुरञ्जितम्" (नारदपरि० ३।३०) इति। तत्र प्रकृतायां तस्यां तानि सूत्रयन्ति अनेकेत्यादिना। तत्र=ज्ञानकन्थायामनेके पटखण्डा लग्ना इत्यन्वयः। के च ते ऽनेक इति गूढं प्रसादयति तस्यामित्यादिना। शमादयः=विवेकादिसाधनचतुष्टयं श्रवणादित्रयं तत्त्वंपदार्थशोधनमित्यष्टविधाः। एतेऽतिप्रियत्वादाचार्यैर्गोपिता इति मन्ये ॥२८॥

मू० सुरति की सुई लै सद्गुरु सीवे।
जो राखे सो निर्भउ थीवे ॥२६॥

सं० अ० सुरतिं सूचिं लात्वा सद्गुरुः सीव्यति।
यो रक्षेत् स निर्भयस्तिष्ठेत् ॥२६॥

भा० प्र० सुरतिं सूचिमादाय, कन्थां सद्गुरुसीवनाम्।
परिदधीत यो भक्त्या, स भवेन्निर्भयोऽभवः ॥४३॥

श्रु० सं० तामिमां कन्थां कया सूच्या कः सीव्यति किञ्च तद्धारणफलमिति सर्वं पुञ्जीकृत्याहुः सुरतिमित्यादिना। सुरतिं वात्सल्यप्रीतिमादाय सद्गुरुर्ज्ञानकन्थां शिष्यहृदि सीव्यति। तज्ज्ञानं यः परिपालयति सोऽभयो भवतीत्यर्थः। निर्भउ इति पदस्यार्थद्वयं भवाभावं भयाभावं चाविष्कुर्वन् सूत्रं व्याचष्टे सुरतिमित्यादिना। प्रसन्नम् ॥२६॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० स्याह सफेद जरद सुरखाई ।
जो लै पहिरै सो गुरुभाई ॥ ३० ॥

सं० अ० श्याम---श्वेत---पीतरक्तता यो लात्वा परिदधीत स गुरुभ्राता ॥ ३० ॥

भा० प्र० गुरुशब्दो हि कोशादे, गुरुपित्रर्थबोधकः ।
गुरुभाईपदस्यात्र, मताऽतोऽर्थद्वयी गुरोः ॥ ४३ ॥
गुरुनिमित्तको भ्राता, पितृनिमित्तकोऽप्ययम ।
शाकपार्थिववज्ज्ञेयः, समासो नान्यसम्भवः ॥ ४४ ॥
"अज्येष्ठासः" "स पूर्वेषा", मित्याद्यृक्सूत्रमानतः ।
गुरुभ्रातर एते नः, ज्येष्ठाल्पिष्ठसमायुषः ॥ ४५ ॥
वर्णाकृतिविभेदेन, भिन्ना आर्यादिजातयः ।
समा समा हि सम्मान्याः, परेशैकगुरुत्वतः ॥ ४६ ॥
आस्तिका नास्तिका वापि, यस्मिन् कस्मिन्मते स्थिताः ।
सधना निर्धना वा स्युः, समा एकगुरुत्वतः ॥ ४७ ॥
वर्णा विप्रादयो वर्णैः, श्वेतलोहितपीतकाः
श्यामाः शास्त्रसमादिष्टाः,समा एकगुरुत्वतः ॥ ४८ ॥
सत्वं श्वेतं रजो रक्तं—पीतं श्यामस्तमोगुणः ।
तद्वन्तः प्राणिनः सर्वे, समा एकगुरुत्वतः ॥४९ ॥

श्रु० सं० आर्यजनद्रुमशोषनिदानं महद्वैषम्यविषमपनिनीषुर्भ्रातृस्नेह पीयूषमभिषिञ्चन्त्याचार्याः श्यामेत्यादिना । कृष्णादीनि पदानि रूपगुणकर्मसु प्रायस्तैर्थिकैर्बहु प्रयुज्यन्ते । यथा "वर्णमात्रेण कृष्णः"

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

"कृष्णा रूपाण्यर्जुना" (ऋ० १०।२१।३) इत्यादौ लोके वेदे च रूपेषु। "अजामेकां लोहितशुक्लकृष्णां" (श्वे० ४।५) इत्यादौ सत्त्वादिगुणेषु। "चतुष्पात्खल्वियं कर्मजातिः कृष्णा, शुक्लकृष्णा, शुक्ला, अशुक्लकृष्णा" (यो० भा० ४।७) इत्यादौ पुण्यादिकर्मसु। तथा चायमर्थोऽत्रसम्पन्नः श्यामादिरूपं, श्यामादिगुणं, श्यामादिकम वा ये मनुष्या दधते ते समे सम्माननीया भ्रातर इति। गुरुभ्रातृशब्दो व्यस्यते प्रसादिन्यां गुरुभाईत्यादिना। सौत्रार्थः श्रौतार्थेन पातञ्जलेन सौत्रार्थेन च संवाद्यतेऽज्येष्ठास इत्यादिना। अज्येष्ठासो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय" (ऋ० ५।६०।५) इति मन्त्रभागः। अस्यार्थः- अज्येष्ठासः=न कश्चन ज्येष्ठः प्रधानो वर्तत येषां ते ऽज्येष्ठा। छन्दस्यसुगागमः। अकनिष्ठासः=न कनिष्ठः=गौणा विद्यते येषां ते। एवंभूता समे समा भ्रातर सौभगाय=आत्मान्नयनाय संवावृधुः=संवर्धन्तामित्यर्थः। सूत्रार्थस्तूक्तः। श्यामादिरूपं सङ्गमयति वर्णाकृतीत्यादिना। श्यामादिरूपभेदेन प्रसिद्धा आर्यादिजातयः समाः समाना माननीयाः। यतः खल्वमूषामेक एव पितेत्यर्थः। अत्रेमे मन्त्रवर्णाः सन्ति "त्वं हि नः पिता वसो" (ऋ० ८।९८।११)। "प्रियः समानानां भूयासम्" (अथ० १७।१।५)। "य एक इद् राजा जगतो बभूव य ईशे अस्य द्विपदः" (ऋ० १०।१२१।३) इति। श्यामादिगुणं सङ्गमयति-आस्तिकेत्यादिना। आस्तिकत्वादयः सत्त्वादिपरिणामा बुद्धिधर्मा इति बोध्यम्। आस्तिकादयो मिथः संव्यवहरन्त्विति भावस्तथैव श्रूयते "सञ्ज्ञानं नः स्वेभिः संज्ञानमरणेभिः" (अथ० ७।५२।१) इति। नः=अस्माकं स्वेभिः=ईश्वरपुत्रैः अरणेभिः= न रणः शब्दप्रमाणं येषां ते तैर्नास्तिकैः सञ्ज्ञानं स्यादिति तदर्थः। श्यामादिकर्मतां व्यनक्ति सधनेत्यादिना। पुण्यादि

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कर्मभिः सधनत्वादिकमिति शास्त्रडिण्डिमः। सधनादीनां समाना प्रीतिः स्यादित्यर्थः। श्रूयतेऽपि "मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा। सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया" (अथ० ३।३०।३) इति। दारिद्र्यादि निमित्ते समुपस्थितेऽपि मा मिथो द्विक्षन्तापि तु सुप्रीतिमन्तो भवेयुरिति हृदयम्। श्यामादिरूपेष्ववान्तरविशेषमाह वर्णा विप्रादय इति। ब्राह्मणादयो वर्णाः समाना दर्शनीया इतिभावः। प्रमाणमत्र भगवान् वेदः "प्रियं सर्वस्य पश्यत उत शुद्रे उतार्ये" (अथ० १६।६२।१) "रुचं नो धेहि ब्राह्मणेषु रुचं राजसु नस्कृधि। रुचं विश्येषु शूद्रेषु मयि धेहि रुचारुचम॥" (वा० यजु० १८।४८)। यावद् ब्रह्म क्षत्र विट् शूद्रो मानव्यो ह्येताः सर्वाः प्रजाः" (शत० १४४।२।२७) इत्यादि। श्यामादि गुणं कण्ठत आह सत्त्वमित्यादिना। निगदवेद्यमिदं पद्यम् ॥३०॥

मू० त्रै गुण चकमक अगिन मथि पाई।
दुःख सुख धूनि देहि जलाई ॥३१॥

सं अ० त्रिगुणं चकमकमग्निर्मथित्वा प्रापि।
सुखदुःखमग्निकुण्डे देहेऽदाहि ॥३१॥

भा० प्र० लौहचक्रादिना घाते, यः प्रणिमयते ऽनलम।
संज्ञाकेर्लोप एषो ऽश्मा, चकमाक् इति कीर्त्यते ॥५०॥
अश्मान त्रिगुणं चित्तं, मथित्वाऽऽहृत्यदीपितम।
प्राप्तं ज्ञानमयं ब्रह्म, ब्रह्माग्निशब्दशब्दितम ॥५१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दुःखं सुख च तद्धेतुः, कर्माणि विविधान्यतः ।
देह एवाग्निकुण्डे ऽस्मिन् , भस्मसादकृषि द्रुतम ॥५८॥
ब्रह्मपुत्रो ऽम्बुधिं प्राप्य, गतस्ततस्तदात्मताम् ।
बीजाभावाद्भवो भावी, भूयः सम्भाव्यते नहि ॥५३॥

श्रु० सं० अलमेतेन लौकिकानलेन योऽत्यल्पमुपकरोति, भस्मीकृताखिला विम्नकजालावलेपं मामकीनं दहनं पश्यतु भवानित्याहुराचार्य्याः त्रिगुणे त्यादि । त्रिगुणम्=सत्वादिगुणत्रयमयं चित्तात्मकम् अश्मानम्=अग्नि पाषाणं चकमाकाख्यं मथित्वा अग्निः प्रापि, अग्निकुण्डे देहे स्थिते तस्मिन् सुखं दुःखं चादाहीत्यन्वयार्थः । स्थूलशरीररूपवेदिकायां चित्त मरणिं कृत्वा निर्मथित आत्मदर्शनाग्नौ दुःखाद्युपलक्षितकर्मतत्कारणाज्ञानं भस्मसात्कृतमिति भावः । बहु श्रूयतेऽप्येव " शरीरं कस्माद् अग्नयो ह्यत्र श्रियन्ते ज्ञानाग्निर्दर्शनाग्निः कोष्ठाग्निरिति । ज्ञानाग्निः शुभाशुभं कर्म विन्दति " (गर्भो० ५) इति । स्वदेहमग्निं कृत्वा प्रणवं चोत्तरारणिम । ध्याननिमथनाभ्यासाद्देवं पश्येन्निगूढवत " (श्वे० १।१४) इति । अत्र देहः सूक्ष्मदेहो ऽन्तःकरणमन्यथा ध्यान रूपमन्थनानुपपत्तेरिति बोध्यम् । " सप्रेद्धो अग्निर्जिह्वाभिरुदेतु हृदयादधि " (अथ० ६।७६।१) इति । " पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतं । तस्मिन् यद्यक्षमात्मन्वत्तद्वै ब्रह्मविदो विदुः ॥ (अथ० १०।८।४३) इति च । नवद्वारं पुण्डरीकम्=स्थूल शरीरं त्रिभिर्गुणेभिरावृत्तम्=सत्त्वादिगुणत्रयसंवलितमस्ति तस्मिन् शरीरे आत्मन्वत्=मनोनुद्रष्टव्यम् यक्षम्=पूज्यं तद्=प्रसिद्धं ब्रह्म ब्रह्मविदो विदुरित्यर्थः । अग्निपदसूचितं स्फोरयन्सूत्रं व्याचष्टे प्रसादिन्याम् अश्मे त्यादि । त्रिगुणं चित्तमश्मानं मथित्वेत्यन्वयः । ज्ञानमयं ब्रह्मात्राग्नि पदाभिप्रेतमिति न स्वकपोलकल्पितमपि तु श्रुतिप्रसिद्धमित्याह ब्रह्माग्नि

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

शब्दशब्दितमिति। ब्रह्मणि = वेदे अग्निशब्दोदितमित्यर्थः। तथा च मन्त्राः "एतद्वै ब्रह्म दीप्यते यदग्निर्ज्वलति" (कौ० उ० १२)। एकं सद्विप्रा बहुधा वदन्त्यग्निम् (ऋ० १।१६४।४६) "त्वमग्न इन्द्रः" (ऋ० २।१।३)। "तदेव अग्निः" (वा० य० ३२।१) इत्यादिकाः। दुःखमिति सुखदुःखे तस्मिन्नग्नौ भस्मसादक्षीति भावः। तथैव श्रूयते "इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च। यमर्का अध्वरं विदुः। (ऋ० ८।६३।६) यमध्वरम् = अविनाशिनमर्काः = ज्ञानिनो विदुः, तस्मिन्निन्द्रे विश्वानि सर्वाणि वीर्याणि दृढानि कृतानि सञ्चितानि कर्त्वानि क्रियमाणानि कर्माणि प्रतिष्ठितानीति तदर्थः। स्यादेतन्मन्यतामग्नयुत्पत्तिस्तत्र कर्मबीजदाहोऽपि किन्तु यथोषितवेत्रबीजेभ्यो रम्भाभिनवोद्भेदारम्भो भवति यथा वा दग्धजीवितब्राह्मणतो ब्रह्मराक्षसस्तथा प्लुष्टादृष्टात्कोऽप्यन्योऽतिरौद्रो महोपद्रवः प्रादुर्भविताऽतो मा तद्धाक्षीत् क्षेमाकाङ्क्षी भवान्—इति मावोचो, यतोऽत्रत्यो ऽग्निः समूलदाहं दंदहीति दुःखनिदानमिदमेव निदर्शनान्तरेण साधयति ब्रह्मपुत्रेत्यादि। "यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" (मु० ३।२।८) इति श्रुतिसामान्यस्य विशेषनिगमनमेवैतदिति बोध्यम् ॥३१॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० संयम कपाली शोभाधारी ।
चरणकमल में सुरति हमारी ॥३२॥

सं० अ० संयमः कपाली शोभाधारी, चरणकमलेषु सुरति रस्माकम् ॥३२

भा० प्र० शोभाधारी कपाली तु, सर्वकर्मसु संयमः ।
गुर्वविनाशिपादाब्जे, सुरतिः सुरतिः मती ॥५४॥

अ० सं० "कपालं वृक्षमूलानि कुचेलमसहायता । समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम्" (मनु० ६।४४) इत्यादिशास्त्रेषु केवलं कपालधारणं मुक्तलक्षणमुक्तमिति मा कश्चित्सन्दिग्धादिति संयमरूपं तन्निरूप्यते संयम इति। संयमः=समानविषयं धारणादित्रयम् । तथा च सूत्रम् "त्रयमेकत्र संयमः" (यो० सू० ३।४) इति । स एव कपाली=हस्तं कपालं मृदादिमयं कर्परादिभिक्षापात्रमित्यर्थः । कपालं धारयेन्मा वा संयमस्त्वावश्यक इति भावः । संयमफलं ध्वनयन्तं विशिनष्टि शोभाधारीति । शोभाम्=प्रज्ञालोकं धारयति प्रापयति जितः सन्निति शोभाधारी संयमस्तथोक्तं पातञ्जले "तज्जयात्प्रज्ञालोकः" (यो० सू० ३।५) इति । तं भूमिषु विनियुङ्क्ते चरणकमलेष्वित्यादि । अयं भावः- पूर्वं भगवतो विराजः स्वरूपे संयमः कृतः, यथा श्रूयते "विभ्राजन् ज्योतिषा स्व, अगच्छो रोचनं दिवः । देवा ते इन्द्र सख्याय येमिरे" (ऋ० ८।८७।३) इति। हे इन्द्र ! त्वं ज्योतिषा=स्वभासा स्वः=सर्वं विभ्राजन्=भासयन्नास्से त्वमेव रोचनम्=भास्करं दिवः=दिवि अगच्छः=अगमयः । ते सख्याय=समानं ख्यापयितुमात्मानं देवाः= योगिनः येमिरे=त्वयि संयमं चक्रुरित्यर्थः । ततः क्रमेण भगवतः सूक्ष्मेऽवयवे चरणकमले संयमः क्रियते, अयमेव संयमक्रमो भूमिविनियोगो

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

गरुडादौ गम्यते "स्थित्यर्थं मनसः पूर्वं स्थूलरूपं विचिन्तयेत्। तत्र तन्निश्चलीभूतं सूक्ष्मेऽपि स्थिरतां व्रजेत् ॥" इति। इदं सर्वमभिसन्धाय व्याचष्टे शोभाधारीत्यादि। निगदव्याख्यातम् ॥३२॥

श्री ... जी

मू० भावभोजन अमृत कर पाया।
भला बुरा मन नहीं बसाया ॥३३॥

सं० अ० भावो भोजनममृतं कृत्वा प्राप्तः।
साध्वसाधु मनसि नहि वासितम् ॥३३॥

भा० प्र० भावो हि भोजनं भव्य, प्राप्तममृतसम्मितम्।
रसारससमीक्षा मे, मनसि न समागता ॥५५॥

श्रु० सं० अलौकिके कपाले भव्यं भोजनं तद्गतं च सूत्रयन्ति भाव इत्यादिना। भगवच्चरणारविन्दनिष्यन्दमत्तमधुव्रतोऽयं योगी तद्रूपद्रवितहृद्भावामृतमेव सेवते सुगीतं "मनःस्थैर्यं फलमिदं, यदा पक्वं भवेत्तदा। माधुर्यं ब्रह्मरसतां प्राप्तं हंसैः सुसेव्यते ॥" (क० गी०५।८४) इति साध्वसाधु मनसि न वासितमिति व्रतम्। तथैव श्रूयते "अन्नं न निन्द्यादिति। स्वयमेवान्नमुखेन भगवानप्याहादित्यपुराणे "प्राणार्थं मां सदा ध्यायेत्स मां सम्पूजयेत्सदा। अनिन्दँश्चैतदद्यात्तु दृष्ट्वा हृष्येत्प्रसीदेच्च" ॥ इति। इदं सर्वं विशारदीकरोति प्रसादिन्यां भावो हीत्यादि। स्पष्टम् ॥३३॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० पात्रचार करुत्र्या बहुगुणा,
करमण्डल तुम्बा किश्ती घना ॥३४॥

सं० अ० पात्रविचारो दारुपात्रं वर्धमानकः,
कमण्डलु तुम्बिका खर्परघनः ॥३४॥

भा० प्र० पात्रापात्रविचारो हि, काष्ठमृत्स्नामयान्यथ ॥
कुण्डीतुम्ब्यावमत्राणि, कपरादिवहूनि च ॥५६॥

अ० सं० व्यवहिते वितर्कं संसूच्य विचारमत्र पात्रभेदेन सूत्रयति पात्रविचार इत्यादिना । विचारः=विशेषेणाचरणं सूक्ष्मवस्तुपर्यन्तं सूक्ष्मविषयश्चित्ताभोग इति यावत् । तथा च "सूक्ष्मो विचार" इति योगभाष्यम् । "सूक्ष्मगताशेषविशेषसाक्षात्कार" इति वार्तिकं च । अयमेव विचारो जलभाजनमिति भावः । अस्यैवावान्तरभेदा दारुपात्रमित्यादिकाः । व्याचष्टे पात्रेत्यादिना । तुम्बिकादीनि यतिपात्राणि मनुनोक्तानि "अलाबुं दारुपात्रं च मृण्मयं वैदलं तथा । एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत्" ॥ (मनु० ६।५४) इति ॥३४॥

अमृत प्याला उदक मन दिया,
जो पीवे सो शीतल भया ॥ ३५ ॥

सं० अ० अमृतप्रियालये उदकं मनसि दत्तं, यः पिबेत्स शीतलो भवेत् ॥ ३५ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

भा० प्र० अमृतं ब्रह्ममन्त्रोक्तं, पेपीयन्तेऽत्र साधवः।
शुद्धमतो मनस्त्वेतद्, ब्रह्मणोऽस्ति प्रियालयः ॥ ५७ ॥
अमृतमुदकं तस्मिन्, गुरुदत्तं पिबन्ति ये।
शान्तिभूतजगत्तापा, जीवन्मुक्तास्तु सन्ति ते ॥ ५८ ॥

श्रु० सं० युष्माकं चषकं दारुमयं तत्र जलं तेन तृषा शाम्यतीव स्तोकम्। अस्माकन्तु चित्रं चषकं जलं फलञ्चेत्याहुराचार्या **अमृत-मित्यादिना**। अमृतमुदकं प्रियालये मनसीत्यन्वयः, उक्तं हि "**यथा-सख्य क्रमेणैव क्रमिकाणां समन्वयः**" इति। तथा च मनोरूपे प्रियालये=चषके दत्तम् अमृतात्मकमुदकं यः पिबेत्स शीतलो भवेदित्य-क्षरयोजना। व्याचष्टे **ऽमृतं ब्रह्मेति**। "**इदममृतमिदं ब्रह्मेति**" (बृ० २।५।१) इत्यादि श्रुत्युक्तममृतं ब्रह्म पिबन्ति योगिनो स्वहृदये, सूक्तं "**नारायणाख्यपीयूष पिब जिह्वे निरन्तरम्**" इति। अत इद मनो ब्रह्मणो भवति प्रेमालय इत्यर्थः। अयं भावो ब्रह्मापरिच्छिन्नमपि स्वाभिव्यञ्जिकया बुद्ध्या परिच्छिन्नत्वेन व्यपदिश्यते किं बहुना स्वय-मेवाभ्युपैति भगवानादिपुराणे "**सदामुक्तोऽपि बद्धोऽस्मि भक्तेषु स्नेहरज्जुभिः। अजितोऽपि जितोऽहं तैरवशोऽपि वशीकृत**" इति। अत एवायं गुहावासीति श्रूयते बहुत्र "**अग्निर्देवेषुसंवसुः**" (ऋ० ८।३६।७)। अग्निः=परेशो देवेषु विद्वद्बुद्धिषु वसतीत्यर्थः। **चित्रं सन्तं गुहाहितं सुवेदं**" (ऋ० ४।७।६) स्पष्टम्। "**य ईं चिकेत गुहाभवन्तमा यः ससाद धारामृतस्य**" (ऋ० १। ६७।४) इति। यः ईम्=इमं गुहाभवन्तम्=हृदि सन्तं चिकेत= जानाति यः ऋतस्य=सत्यस्य मोक्षस्य धारां=प्रवाहं आससाद= प्राप्नोतीत्यर्थः। एतदुक्तं भवति—अनादिद्वन्द्वोद्दामदवदंदह्यमानमानसमा-नवो दयालुदेशिकोपदेशादिशा स्वान्तःस्थमात्मामृतमापीयैव शंशमीति चिरायेति चारुतरमुक्तममृतमुदकमित्यादिना ॥ ३५ ॥

Library
Jangamwadi Math, VARANASI,
Acc. No. ...
CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० इडा में आवे पिङ्गला में धावे,
सुषमन के घर सहज समावे ॥ ३६ ॥

सं० अ० इडयाऽऽवायात् पिङ्गलया धावेत्, सुषुम्नागृहे सहजं समवेयात् ॥ ३६ ॥

भा० प्र० विष्णुपदामृतं पीत्वा, नाड्येडया यथाविधि ।
अन्तः क्षीणं बहिस्तच्च, पिङ्गलया प्रवाहयेत ॥ ५६ ॥
प्रतीपं विदधीतापि, रुन्ध्यादन्तः सुषुम्नया ।
प्राणार्थो गुरुणेयं दिक्, प्राणायामस्य दर्शिता ॥ ६० ॥

श्रु० सं० अमृतपानेन तृप्तिरुक्ता । तस्य प्राप्तिस्तु सद्गुरूपदेशादिशोक्ता । इदानीम् एतयोर्ध्वमायन्नमृतत्वमेतीति संक्रांतता सेयं दिगच्यते इडयेत्या दि । इडावामाचन्द्रनाडीगङ्गेत्यादिभिः शब्दैर्वामनाडीं व्यवहरन्ति ध्यायिनस्तथैव पिङ्गलादक्षिणासूर्यनाडीयमुनेत्यादिभिः दक्षिणनाडीं, सुषुम्नामध्याशून्यनाडीसरस्वतीत्यादिभिर्मध्यनाडीम् । तत्र तथा विधेयं साधकैर्यथा प्राण इडया नाड्या आवायात्=अन्तः प्रविशेत् पिङ्गलया नाडया धावेत्=बहिर्निस्सरेत् सुषुम्नागृहे=दशमद्वाररूपं समवेयात्=स्थिरो भवेदित्यक्षरार्थः । प्रसादिन्यां विष्णुपदेति । विष्णुपदम्=नभस्तत्रस्थममृतं शुद्धं वायुमित्यर्थः "अमृतास्तज्ज्ञेति" मरुद्रूपश्रवणात् । असति विशेष इडया पूरणं पिङ्गलया च रेचनमिति क्रमः । श्रूयते हि "प्राणं प्रागिडया पिबेन्नियमित भूयोऽन्यया रेचयेत् पीत्वा पिङ्गलया समीरणमथो बध्वा त्यजेद्वामया । सूर्याचन्द्रमसोरनेन विधिना ऽभ्यासं सदा तन्वतां, शुद्धा नाडिगणा भवन्ति यमिनां मासत्रयादूर्ध्वतः ॥ (शाण्डिल्यो०) इति । भारतीयार्यपरमाचार्याणामसाधारणं दर्शनमाह प्राणेत्यादिना ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

प्राणार्थां= प्राणशोधनाय आयुर्वर्धनाय वेत्यर्थः । तथैव मन्त्रवर्णेषु वर्ण्यते " द्वाविमौ वातौ वात आसिन्धोरा परावतः । दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः " (ऋ० १०।१३७।२)। आसिन्धोः=रक्तवाहिनीपर्यन्तं आपरावतः=बहिर्दूरपर्यन्तं च क्रमश इमौ द्वौ प्राणापानौ वातौ वातः । तयोरन्यः=प्राणः ते=योगिनः दक्षम्=बलम् आवातु=समानयतु, अन्यः=अपानो यद्=यो रपः=दोषस्तं विवातु= अपनयत्वित्यर्थः । "मुनयो वातरशना पिशङ्गा वसते मला । वातस्यानुध्राजिं यन्ति यद्देवासो अविक्षत" ॥ (ऋ० १०।१३६।२)। वातरशनाः=वाताशनाः (रुडागमश्छान्दसः) मुनयः पिशङ्गा=काषायवस्त्राणि मला=वल्कलरचितानि वसते=परिदधते वातस्य=प्राणस्य अनुध्राजिम्=गतिं यन्ति=अनुगच्छन्ति यद्=यत्र सुषुम्नायां देवासः=पूर्वे विद्वांसः अविक्षत्=प्रविष्टा इत्यर्थः । "आयुर्यत्ते अतिहितं पराचैरपानः प्राणः पुनराताविताम्" (अथ० ७।५३।३ इति । यत्ते आयुः पराचैः=विरुद्धाचारैः अति हितम्=न्यूनतां गतं तत् तौ प्राणोऽपानश्च पुनः आ इताम=आनयतामित्यर्थः ॥३६॥

मू० निराशमठ निरन्तरध्यान ॥३७॥

सं० अ० निराशमठे निरन्तरं ध्यानम् ॥ ३७ ॥

भा० प्र० प्राप्तः स सहजावस्थां, निराशमठमाश्रितः ।
ध्यायेन्निरन्तरमात्मानं, समाधिना निरन्तरम् ॥ ६१ ॥

श्रु० सं० निरुपद्रवे मनोनुकूले मठे प्रत्ययैकतानतानुष्ठानं विदधति निराशेत्यादिना । निराशे=सर्वैषणाविनिर्मुक्ते चित्तमठे निरन्तरम्=विजा-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तीयवृत्तिविच्छेदरहितं ध्यानं विधेयमित्यर्थः । तथैव गीतं भगवता "योगी युञ्जीत सततमात्मानं रहसि स्थितः । एकाकी यतचित्तात्मा निराशीरपरिग्रहः"॥ (गी० ६।१०) इति । श्रूयतेऽपि "युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः" (ऋ० १।६।१) इति । योगिनस्तस्थुषः परिचरन्तम्=स्थावरादिकमभिव्याप्नुवन्तं ब्रध्नम्=बृहन्तम् अरुषम्=अ- साध्यं परमेश्वरं युञ्जन्ति=एकान्ते ध्यायन्तीत्यर्थः । "अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया" (ऋ० ८।७२।३) इति । अयुक्तचित्ता- दतिदूरस्थं तं परमेश्वरमस्मिञ्जनान्तःकरणे योगिनो योगेन प्राप्तुमिच्छ- न्तीत्याशयः । 'ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणै- र्निगूढाम्" (श्वे० १।३) इति च । व्याचष्टे प्राप्तेत्यादिना । नि- रन्तरम्=भेदशून्यमात्मानं सहजावस्थां प्राप्तो योगी निरन्तरम्=सततं समाधिना=समाहितेन मनसा ध्यायेदित्यर्थः ।

"शय्यासनस्थोऽथ पथि व्रजन् वा स्वस्थः परिक्षीणवितर्कजालः ।
संसारबीजक्षयमीक्षमाणः स्यान्नित्यमुक्तोऽमृतभोगभोगी ॥"

इतीयं सहजावस्थाऽभ्यासपरिपाकात्स्वयमेव जायते । उक्तं हि- "उत्पन्नशक्तिबोधस्य त्यक्तनिःशेषकर्मणः । योगिनः सहजावस्था स्वयमेव प्रकाशते" ॥ (वराहो० २।७७) इति । यावदियमवस्था न प्राप्यते तावत्कणोहत्य प्रयत्नो विधेय इति हृदयम् ॥३७॥

मू० निर्भौ नगरी दीपक गुरुज्ञान ॥३८॥

सं० अ० निर्भयनगरीं गुरुज्ञानदीपिकाम् ॥३६॥

भा० प्र० श्रोत्रियब्रह्मनिष्ठश्री-गुर्वाप्तबोधदीपिताम् ।
स्वपरहेतुभीशून्यां, पुरीमधिवसेत्ततः ॥६२॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रु० सं० ध्यानानन्तरं समाधिर्नगरीरूपेण निरूप्यते निर्भयेत्यादिना। अयं भावो ध्यानप्रगल्भं ध्येयप्रवणं चेतो ध्यातृध्याने विस्मृत्य ध्येयैकनिलयं सम्पद्यते श्रूयते हि "युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः। रोचन्ते रोचना दिवि" (ऋ० १।६।१) इति। ऋचः पूर्वभागो ध्यानप्रकरणे व्याख्यातः। समाधिप्रदर्शी भागो "रोचन्ते रोचना दिवीति। अस्यार्थो रोचनाः=प्रकाशिन्यश्चित्तवृत्तयः दिवि=द्योतनात्मके भगवत्येव रोचन्ते=राजन्त इति। भगवान् पतञ्जलिरपि मञ्जुलमाह "तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः" (यो० ३।३) इति। इदं सर्वं मथित्वैव सारमाह प्रसादिन्यां श्रोत्रियेत्यादिना। योगीश्वरगुरुदर्शितदिशा भयहेतुद्वैतशून्यामद्वैतात्मनगरीमधिवसेत् साधक इति भावः ॥३८॥

मू० ईस्थर ऋद्धि। अमरपद दण्डा ॥३६॥

सं० श्र० स्थिरतद्धिः। अमरपदं दण्डः ॥३६॥

भा० प्र० नियमस्थिरतर्द्धिः स्याद्, दण्डोऽमरपदस्थितिः।

श्रु० सं० पूर्वोक्तां चित्तस्थिरतां स्तोतुं तामृद्धयभेदेन निरूपयन्ति स्थिरतर्द्धिरिति। चित्तस्थिरता=समाधिरेवर्द्धिः समृद्धिरस्माकमित्यर्थः। "ऋद्धिः स्यादौषधीभेदे समृद्धावपि योषिती" ति मेदनी। यथा समृद्धा जना धनधान्यसमृद्धया स्वं धन्यं मन्वते, तथैव चित्तस्थिरतयात्मानं कृतकृत्यं मन्यते श्रौतो मुनिः। गीतं हि भगवता "स्थिरबुद्धिरसंमूढो ब्रह्मविद्" (गी० ५।२०) इति। किमालम्बनं चित्तं तत्र स्थितिपदं लभत,

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इत्यस्योत्तरं ब्रूते अमरपदं दण्ड इति । त्रीणि खलु पदानि मरपदं, मरामरपदम्, अमरपदं चेति । तत्र प्रथमं मरपदम्=माया म्रियमाणत्वात्पत्तव्यत्वाच्च । यतो मायाभूमौ पतितानामुत्तिष्ठासूनां गुरुशास्त्रादिरूपेण परिणता मायैव परमालम्बनं, नहि तदानीं निराधारमाकाशमालम्बितु शक्यते । द्वितीयं मरामरपदम्=जीवः शरीरसंबन्धेन मर्त्यत्वात्स्वतोऽमरत्वाच्च श्रुयते हि "अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः" (ऋ० १।१६४।३८) इति । स्वधया=स्वस्मिन्दधाति जगदिति स्वधा माया तया गृभीतः=गृहीतः मर्त्येन=नश्वरेण सूक्ष्मशरीरेण सयोनिः=देहान्तरप्राप्तिनिमित्तसहितः सन्नपाङ् प्राङेति=घटीयन्त्रन्यायेन संसरतीत्यथः । एतदेव द्वितीयं पदं मध्यममिति क्वचिदम्नायते तस्य भ्राता मध्यमोऽस्त्यश्नः" (ऋ० १।१६४।१) इत्यादौ । तस्य=परेशस्य मध्यमो भ्राता अश्नः=कर्मफलभोक्तेत्यर्थः । तृतीयममरपदम्=परं ब्रह्म तस्य सर्वथा सर्वदाऽमृतत्वान्मुमुक्षुभिः पदनीयत्वाच्च । इदमेव परमं पदं, परं पदं परमं धाम, तृतीयं धामेत्यादिपदैर्गीयते । तथाहि "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" (ऋ० १।२२।२०, अथ० ७।२६।२, वा यजु० ६।५, तै. सं. १।३।६।२) । "स सर्वसमतामेत्य ब्रह्माप्येति परं पदम्" (मनु० १२।१२५) "तद्धाम परमं मम" (गी० १५।६) । "यत्र देवा अमृतत्वमानशानास्तृतीये धामन्नध्यैरयन्त" (वा. यजु० ३२।१०) इति । मुक्ता यत्र तृतीये धाम्नि गता इत्यर्थः । तदेतदमरपदं दण्डोऽवलम्बनमस्ति श्रूयतेऽपि "आ त्वा रम्भं न जिव्रयो ररम्भा शवसस्पते । उश्मसित्वा सधस्थ आ" (ऋ० ८।४५।२०) इति, हे शवसस्पते=बलाधीश ! जिव्रयो न=अतिवृद्धो यथा रम्भम्=दण्डमाश्रयति तथाहं त्वा=त्वां ररम्भा=आलम्बे सधस्थे=सहवासस्थाने त्वा=त्वाम् आ उश्मसि=अभिन्नं

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ऽमय इति तदर्थः । आलम्बमानञ्चामरपदं गमयत्येव तदिति श्रूयते "त्व तमग्ने अमृतत्व उत्तमे मर्त्त दधासि" (ऋ० १।३७।७) इति । हे अग्ने ! त्वं तम्=स्त्रोपासकं मर्तम्=मनुष्यमुत्तमेऽमृतत्वे=उत्तमेऽमरपदे दधासि=नयसीत्यर्थः । एतत्सर्वं समाकलय्य प्रसादिनीकृद् व्याचष्टे सूत्रं नियमेत्याद्यर्धेन । ईश्वरनियमे यथा सर्वं स्थिरं तथाऽहमपि तत्र मनः स्थिरं कुर्व इति भावः । श्रूयते हि "अस्थात् द्यौरस्थात् पृथिव्यस्थात् विश्वमिदं जगत् । आस्थाने पर्वता तस्थुस्थाम्न्यश्वां अतिष्ठपम्" ॥ (अथ० ६।७७।१) हे परेश ? यथा त्वयि द्यौरस्थात्=द्युलोकः स्थिरोऽस्ति, पृथिवी स्थिरास्ति, इदं सर्वं जगत् स्थिरमस्ति, आस्थाने=त्वन्नियमे पर्वताः स्थिराः सन्ति । तथैवाहमपि अश्वान्=एकादशेन्द्रियाणि स्थाम्नि=स्थिरे त्वयि अतिष्ठिपम्=स्थिराण्यकार्षमित्यर्थः ॥३६॥

मू० धीरज फहुड़ी ॥४०॥

सं० अ० धैर्यं काष्ठकुद्दाली ॥४०॥

भा० प्र० धैर्य मे काष्ठकुद्दाली, पञ्चकोशापसारिणी ॥६३॥

श्रु० सं० अलौकिकीं काष्ठकुद्दालीमाहुः—धैर्यं काष्ठकुद्दालीति । तपस्विनां काष्ठकुद्दाली लौकिकाग्निं निरावृणोति भस्मापसारणेन, अस्माकं तु धैर्यात्मिकया तया स्वात्मा निरान्नियते कोशापसारणेने

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

तिविशेषः। शृणुमो हि "तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषिका
धैर्येण" (कठ० ६।१७) इति। प्रसन्नमाचार्यकाव्यं तथैवानूद्यते प्रमा-
दिन्यां धैर्यं मे काष्ठकुद्दालीति ॥४०॥

मू० तप कर खण्डा ॥ ४१ ॥

सं० अ० तपः खड्गः ॥ ४१ ॥

भा० प्र० निगमागमसंसिद्धं, तपः खड्गोऽरिकम्पनः।

श्रु० सं० अतिक्रूरकर्माक्रान्तकान्तारेऽपि नापेक्ष्यते खड्गस्त-
पसैव जीयते हिंस्रकजीवजातमित्याहुराचार्यास्तपः खड्ग इति।
खड्गकार्यं तपसैव निर्वर्त्यते तापसैः। शोश्रूयते तथा "तपसा युजा-
विजहि शत्रून्" (ऋ० १०।८३।३)। तपसा वै लोकं जयन्ति"
(शत० ३।४।४।२७)। "स्वं तपः परितप्याजयः स्वः"
(ऋ० १०।१६७।१)। "तपसा देवा देवतामग्र आयन, तपसा
ऋषयः स्वरन्वविन्दन्। तपसा सपत्नान् प्रणुदाम अरातीः,
येनेदं विश्वं परिभूतं यदस्ति" (तै० आ० ३।१२।३) इति पुरा
देवा देवत्वं तपसैवाप्नुवन्। ऋषयस्तपसैव स्वर्गं लोकं लेभिरे। वयं
तपसा दुःखप्रदान् शत्रून् प्रसहामहे। येन तपसा सर्वमिदं जगत्परिभूत-
मस्तीत्यर्थः ॥ ४१ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० वशकर आसा ॥ ४२ ॥

सं० अ० वशीकार, आसः ॥ ४२ ॥

भा० प्र० करणानां वशीकार, आसो दण्डो ममोत्तमः।
निरस्यतेऽन्तरायोऽत, आसः करण अस्यतेः ॥ ६४ ॥

अ० सं० यदा नापेक्ष्यते खङ्गस्तदा दण्डस्य का कथेत्याहुः-वशीकार आस इति। व्याचष्टे करणानामित्यादि। योग्यत्वात्करणानामेवात्र वशीकारो गम्यते। स एवासः=दण्ड उत्तम इत्यर्थः। उत्तमत्वं चास्मिन 'प्राकृतो दण्डो बाह्यकतिपयविघ्ननिवारणे निर्बलानामुत्थानगमनादौ किञ्चित्साहाय्यमाचरति केवलम्। अयं तु निखिलकामाद्यन्तरायनिर सिसिषूणां मुक्तिपथपथिकानामेवमेव शरणं करणवशीकारो नामेति' श्रूयते हि "रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः" (ऋ० ६।७५।६) इति। सुषारथिः=वश्यकरणरथ्यो नियन्ता रथे=शरीररूपे तिष्ठन् यत्र यत्र मोक्षमार्गे गन्तुं कामयते तत्र तत्रेन्द्रियवाजिनो नयति। अभीशूनाम्=सद्वृत्तिरशनानां महिमानं पश्य यत्सारथिमनोऽनुसारं रश्मयः=प्रग्रहास्तुरगाननुयच्छन्ति=नियम्य नयन्तीत्यर्थः। आसशब्दं दण्डे व्युत्पादयति निरस्यत इत्यादि। निरस्यते विघ्नोऽतः अनेन सार्वविभक्तिकस्तसिः। असु क्षेपणे (दि० प० से०) करणेघञ् ॥ ४२ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० समदृष्टि चौगान ।
हर्ष शोक नहिं मन में आन ॥४३॥

सं० अ० समदृष्टिश्चौगानम् । हर्षशोकौ नहि मनस्यानीतौ ॥४३॥

भ० प्र० रागद्वेषावविद्योत्थौ, हर्षशोकौ तदाश्रितौ ।
एतद्विश्वं मया दृष्टं, समदृष्ट्या निरुध्यते ॥६५॥
सैकालम्बा चतुर्गाना, चउगानं नउत्तमम् ।
कगसर्वत्र सूत्राभ्यामत्रत्रलोप ईरितः ॥६६॥

श्रु० सं वाह्याराधारविशेषः काष्ठनिर्मितो योगपादिकेति यागि- प्रसिद्धः सोपाश्रयः चौगानं तदाश्रित्य तन्द्राजय आसनस्थिरतामात्रं च सिद्धयति । आस्माकीनया तथा जन्मादिकं निर्जित्य निराधारे नित्यास्थिरता प्राप्यत इत्याहुः समदृष्टिश्चौगानमिति । वैरागिनीति ख्यातामुपवेशन साधनीमेकपदीं चौगानपदेन परिभाषन्ते योगिनः । अयं भावः समदृष्ट्या जेजीयते जन्म तेष्ठीयते सर्वाधिष्ठाने योगी । गीतं हि भगवता "इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः । निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः" ॥ (गी ५।१९) इति । समद्रष्टृत्वं तमाहुः हर्षे- त्यादि । सुखःदुखप्रसङ्गेऽपि न हृष्येत् नोद्विजेत् तथा च गीतायां "न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम । (गी० ५ २०) अन्यत्रापि "जायाभ्रातृसुतादीनां बन्धूनां च शुभाशुभम् । श्रुत्वा दृष्ट्वा न कम्पेत हर्षशोकौ त्यजेद्यतिः । (नारदपरि० ४।१०) । एतन्निखिलं मनसिकृत्य व्याचष्टे रागेत्यादि । ॥४३॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० सहज वैरागी करै वैराग,
माया मोहनी सकल त्याग ॥४४॥

सं० अ० सहजवैराग्यी कुर्याद्वैराग्यं, मायां मोहनीं सकलां त्यक्त्वा ॥४४॥

भा० प्र० स्वभावतो विरक्तो यां, मायां संसृज्य दुःखितः
मोहनीं सविलासां तां, विसृज्य स्यात्सुखी नरः ॥६७॥

श्रु० सं० अतिपूताचारविरक्तव्रतनिर्णिक्तं श्रौतापरतिपथं कश्चिद्रागाववद्धहृदयो मा दुष्यादित्यनुशासत्याचार्याः सहजेत्यादि । सहजवैराग्यी=प्रकृत्याविरक्तो वैराग्यम्=परिव्रज्यां कुर्यादित्यनुशासनम् । अयं सारो—दुर्लभां सहजावस्थां विरलो लप्स्यते । उक्तं हि "दुर्लभो विषयत्यागो दुर्लभं तत्त्वदर्शनम् । दुर्लभा सहजावस्था सद्गुरोः करुणां विना ॥" इति । स एवोदासीनसम्प्रदायप्रवेशाधिकारीति शुद्धोऽस्य सम्प्रदाय । श्रूयतेऽपि "विरक्तः प्रव्रजेद्धीमान्सरक्तस्तु गृहे वसेत् । सरागो नरकं याति प्रव्रजन्हि द्विजाधमः ॥ (नारदपरि० ३।१३) इति । "अशुद्धौ तु विनष्टायां वैराग्यं जायते ध्रुवम्" (जा० द० ३०७।४७) इति रहस्यं मनसिकृत्य तस्य व्रतमाहुर्मायांमोहनीं त्यक्त्वेति । यद्यपि "केतः केतुश्चेतश्चित्तं क्रतुरसुर्धीः शचीर्मायावयुनमभिख्येत्येकादशप्रज्ञानामानि" (निघ० ३।९) इति निघण्टुवचनाज्ज्ञानसामान्यवचनं मायपदं स्मर्यते । तथाप्यत्र माति जगदस्मिन्निति व्युत्पत्त्या प्रकृत्यभिप्रायमिति बोध्यम् । मोहनीयं माया यतो मोहनीयविषयरूपेण परिणता श्रूयते "मायाह जज्ञे मायाया मायाया मातली परि" (अथ० ८।९५) ता मायां त्यक्त्वेत्यर्थः । गीतमपि "यदा ते मोहकलिलं बुद्धि व्यंतितरिष्यति । तदागन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च"(गी० २।५२) इति । श्रूयतेऽपि

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

"यदिस्थ तमसा वृता जालेनाभिहिता इव। सर्वाः संलुप्येतः कृत्याः पुनः कर्त्रे प्रहिण्मसि" (अथ० १०।१।३८) इति। हे जीवात्मन्! यदि त्वं तमसावृता=अज्ञानमयेन जालेन=मोहजालेन अभिहिता इवस्थ=बद्धोऽसि तदासर्वाः कृत्याः=जन्मकर्त्री मायां विलुप्य=परित्यज्य पुनः कर्त्रे=जगतः कर्त्तारमुद्दिश्य प्रहिण्मसि=परिव्रजेति तदर्थः। 'निमित्तापाये नैमित्तिकस्याप्यपाय' इति नातिरथेनातन्यतं सूत्रं प्रमादिन्या स्वभावत इत्यादि। अपरवैराग्यं लक्षितं, परं सूचयन्ति सकलेति। यां मायामुपगूह्यानर्थं परम्परामुपैत्तामपहत्यैव मर्त्यो लप्स्यते शर्मेति सङ्क्षेपः। एतदुक्तं भवति यावदेतज्जगज्जालमयं जीवसुपर्णो न हणाति तावदुत्पतनमसम्भवि। नानायासेन भेदनीयं महद्धीदं श्रूयते "अयं लोको जालमासीच्छक्रस्य महतो महान्" (अथ० ८।८।८) इति। अतोऽदभ्रविक्रमेण विदारणीयमेतदधुनैव। अपरथावर्तकीटतां मायाग्राहो नेष्यति, तथा चाम्नायते "अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो-मर्त्येना सयोनिः" (ऋ० १।१६४।३८) इति। अमर्त्यो=स्वरूपेण मरणधर्मा जीवः मर्त्येन=नश्वरेणान्तःकरणेन सयोनिः=सहावस्थानः स्थूले शरीरे मनसा साकं स्थित इति यावत् स्वधया=स्वस्मिन् दधाति जगदिति सा तया मायया गृभीतः=गृहीत अपाङ्=नीचैः प्राङ्=उपरि घटियन्त्रक्रमेण एति=बम्भ्रमीतीत्यर्थः। विलीने चास्मिन्मोहजाले स्वात्मरतिरेवावशिष्यते नावशिष्यते जागतविषयजातौत्सुक्यमात्रापि सूक्तं "विलोलालकवल्लर्यो हेलावलितलोचनाः। न नन्दयन्ति तं नार्यो मृगयो वनतरुं यथा" (यो० वा० वै० १०।२०) इति ॥४४॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० नाम की पारवर ॥ ४५ ॥

स० श्र० नाम प्रक्खरः ॥ ४५ ॥

भ० पु० देवस्य प्रथमस्याग्ने, श्चारु नाम मनामहे ।
जीवेनर्चि प्रतिज्ञातं, जपस्तदर्थभावनम् ॥६८॥
योगसूत्राच्च यौगिकया:, शक्ते र्नामपदस्य च ।
सार्थनाम्नः परेशस्य, मननं प्रक्खरः शुभः ॥६९॥
तदेव मननं साधु, यत्कर्तुगु णकर्मणी ।
ईशस्यैव सदा स्यातां, सँल्लग्ने विश्वशर्मणि ॥७०॥

श्रु० सं० पवनतुरङ्गममारुह्य युद्धं विधास्यते, तत्राश्वरक्षकमनुरूपं वर्म ब्रुवते नामप्रक्खर इति। यथा वर्मरहितो भौतिकस्तुरगः प्राकृते समरे स्थातुमेव नार्हति दूरे विजय, एवमाध्यात्मिके ऽनीके प्रणिधान-वर्मणा विना प्राणाश्वः स्थिरतामेव न लप्स्यते का कथाऽऽत्मसाम्राज्यजयस्य ऽतस्तदेव नामजपनं वर्म क्रियते समाधिसिद्ध्यर्थमिति चतुरस्रम्। अत्र वेदः प्रमाण "नाम नाम्न जोहवीति पुरा सूर्यात्पुरोषसः यदजः प्रथमं संबभूव सह तत्स्वाराज्यमियाय यस्मान्नान्यत्पर-मस्तिभूतम ॥ (अथ० १०।७। १) इति। यः=प्राणरणपण्डितो नाम्ना ईशनाम्ना नाम=नम्यं नामिनं वा परं पुरा सूर्यात्=आदित्योदयात्पूर्वं पुरोषसः= उषायाः पुरा जोहवीति=भूयोभूय आह्वयति । यत्=यदा अजः=गत्वरः प्राणः प्रथमम्=मुख्यं, व्युत्क्रमेण प्रथमं वा दशमं द्वारं, सम्बभूव=संस्थितो भवति तत=तदा सः=ध्यायी स्वाराज्यम्=परमानन्दम् इयाय=प्राप्नोति यस्मात् परम् अधिकं भूतं नास्ति=किमपि वस्तुनास्तीत्यर्थः। स्यादेतत्सूत्रे निर्विशेषितं नामपदं सन्देहमातनोति कस्य नाम जपनीयमिति। नायं द्वापरो ऽसम्भवी श्रूयते यतः " कस्य नूनं कतमस्यामृतानां मनामहे

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

चारुदेवस्य नाम" (ऋ० १।२४।१) इति । वयं अमृतानां = अमराणां मध्ये कस्य = सुखरूपस्य कतमस्य देवस्य चारु = रुचिरं नाम नूनम् = निश्चयेन मनामहे = मनेमेत्यर्थः । तदेता संशीतिमपनेतुं श्रौतमेवोत्तरं वितरन् सूत्रं व्याचष्टे प्रसादिन्यां देवस्येत्यादि । "अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारुदेवस्य नाम" (ऋ० १।५४।२) इत्यर्धर्चम् । वयममृतानां मध्ये प्रथमस्य = मुख्यस्य अग्नेः = अग्रण्यः स्वयंप्रकाशस्य परमात्मनः चारुनाम मनामह इत्यर्थः । सूत्रस्थनामपदस्य प्रणिधानार्थत्व हेतुमाह "जपस्तदर्थभावनमिति योग सूत्रादिति" नन्वत्रार्थं नामपदस्य कः सम्बन्धो येन तत्तदभिप्रतीत्याह यौगिक्याः शक्तेरिति । योगश्च, म्नायते ऽभ्यस्यते—इति" ।

"म्ना अभ्यासे,, (भ्वा० प० से०) । यद्वा नम्यते शब्द्यतेऽर्थोऽनेनेति "णम प्रह्वत्वे शब्दे च" (भ्वा० प० अ०) । अर्थनिरपेक्षमकिञ्चित्करं नामजपं परिसञ्चष्टे सार्थेत्याद्यर्धेन । सार्थनाममननमेव हि श्रूयते "आस्य जानन्तो नाम चिद् विवक्तन" (ऋ० १।१५६।३) इति । आविजानन्तः = अर्थं स्मरन्तः अस्य = विष्णोः नामचिद् = सत्कारपूर्वं आविवक्तन = सदैव सङ्कीर्तयतेत्यर्थः । "सदा ते नाम स्वयशो विविक्म" (ऋ० ७।२२।५) इत्यादावपि सार्थस्य नाम्नो म्नानमिति बोध्यम् ॥४५॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सू० पवन का घोड़ा ॥४६॥

सं० अ० पवनो घोटकः ॥४६॥

भा० प्र० बाह्यजन्येऽङ्गमर्वेव, मुख्यं पवन आन्तरे।
तं संसाध्य वशीकुर्यु, स्तद्विश्वं विजिगीषवः ॥७१॥

श्रु० सं० मुमुक्षुभिर्मनो जेतव्यमिति सर्वतन्त्रसिद्धान्तमिह वदन्त्याचार्या "मनो मारयित्वैत्यत्र। युक्तिमन्तरा च तज्जेतु न पार्यते। तथवार्योक्तिः "न शक्यते मनो जेतु विना युक्तिमनिन्दिताम्" इति। तत्रासाधारणी युक्तिः प्राणनिरोधनम्। तथा चोक्तं "यः प्राणपवनस्पन्दश्चित्तस्पन्दः स एवहि। प्राणस्पन्दजये यत्नः कर्तव्यो धीमतोच्चकैः" (अन्नपू० ४,८६) इति। तच्च प्राणनिरोधनमुक्तम् "इडये" त्यत्र। तस्य युक्ततमत्वमवद्योतयितु वीरालङ्कारप्रिया अस्मदाचार्याः पुनः प्रावतन्त सङ्गरेऽस्मिन् प्रलयङ्करे पवनो घोटकेत्यादिभिर्दशभिः सूत्रैः। अहोऽस्य पवनघोटको यं जीवनमरणादिनिभं महत् परिवर्तनमायततेऽनुश्रूयते हि "प्राणो मृत्युः प्राणस्तक्मा प्राणं देवा उपासते। प्राणो ह सत्यवादिनमुत्तमे लोक आदधत्" ॥ (अथ० ११।६।११) इति। अस्यार्थस्तु—प्राण एवायोगिनो मृत्युर्योगिनश्च तक्मा=हासयिता प्रसादयितेति यावत्। तत एव प्राणं देवाः=योगिन उपासते। प्राणो हि सत्यवादिनं=सत्यप्रतिष्ठमुत्तमे लोके आदधत=प्रतिष्ठापयतीति। व्याचष्टे चाह्येत्यादि। सुगमम् ॥४६॥

CC-0. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० निःकर्म जीन ॥४७॥

सं० अ० नैष्कर्म्यं पल्ययनम् ॥४७॥

भा० प्र० न कर्मणामनारम्भान्नैष्कर्म्यं केशवोऽब्रवीत् ।
जगौ कर्मस्वनासक्तिं, पल्ययनं तद्वतः ॥७२॥

श्रु सं० पवनाश्वस्य पल्ययनमाहुः नैष्कर्म्यं पल्ययनमिति । नैष्कर्म्यम् = आसक्तिपूर्वकात्कर्मानुष्ठानाद्विरतिः, निष्कामकर्मानुष्ठानं च प्रसज्यपर्युदासाभ्याम् । यद्यपि "नास्त्यकृतः कृतेनेत्यादिश्रुतिभिः सर्वथा कर्मणां त्याग एव विहितो भाति । तदुक्तमन्यत्रापि "परीक्ष्य लोकानित्याद्या आत्मज्ञानविधायिनीः । नैष्कर्म्यप्रवणाः साध्वीः श्रुतीः किं न शृणोषि ताः ॥" इति । तथापि सर्वथा तत्त्यागे न तत्तात्पर्यं, "यज्ञेन दानेन तपसानाशकेन" (बृ० ४।४।२२) इत्यादिश्रुतिभिरेव कर्मविधानात्, निन्दितत्वाच्च सर्वथा कर्मत्यागस्य "न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते" (गी० ३।४) इत्यादौ । तस्मादुक्तयैव दिशा नैष्कर्म्यप्रतिपादिकानां श्रुतीनां तात्पर्यमवसेयम् । तदिदं नैष्कर्म्यं प्राणघोटकस्य पल्ययनम । प्राणायामेन सह नैष्कर्म्यमवश्यमनुष्ठेयमिति हृदयम् । व्याचष्टे न कर्मणेत्यादि । सुव्यक्तम ॥४७॥

मू० तत्त्व कर जोड़ा ॥४८॥

सं० अ० तत्त्वं जोड़ः ॥४८॥

भा० प्र० वस्तु नास्त्यन्तराभावं, जगतो भाव ईश्वरः ।
तत्तत्प्रकृतिके त्वेऽत्र, परस्तत्त्वपुरस्कृतः ॥७३॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

जोड़ः सैव यतोऽनेन, दिष्ट्या जीवोऽत्रजोड्यते।

श्रु० सं० स्यादेतत् प्राणाश्वेन सह नैष्कर्म्यपल्ययनं योजनीयमित्युक्तं तद्रिक्तं वचस्तयोर्मिथः सम्बन्धाभावादित्यत आहुः—तत्त्वं जोड इति। तत्त्वं=परमात्मा "तत्त्व परमात्मनि वाद्यभेदे स्वरूपे च" इति हैमः। जोड़ः कक्ष्या जोड्यतेऽननेति' व्युत्पत्तेः। तथा च प्राणायाम-निष्कामकर्मानुष्ठानयोर्मध्ये उद्देश्यविधया ब्रह्म समर्प्यते। समानोद्देश्यक-त्वं मिथस्तयोः सम्बन्ध इति निर्णयः। आराधकः सर्वाः क्रियाः स्वाराध्येन कक्ष्येव वाजिना योजयन् श्रूयते "इन्द्रासोमा परिवां भूतु विश्वत इयं मतिः कक्ष्या श्वेव वाजिना" (अथ० ८।४।६) इति। हे मदराध्य देव! इन्द्र! सोम! यथा वाजिना=बलवता अश्वेन कक्ष्या= वरत्रा सन्नह्यते तथा ममेयं मतिः कर्मोपासनादिविषया बुद्धिः वां परि-भूतु=त्वामुद्देश्यं परिप्राप्नोत्वित्यर्थः। व्याचष्टे वस्त्वित्यादि ॥४८॥

सू० निर्गुण ढाल ॥४६॥

सं० अ० निर्गुणः फलकः ॥४६॥

भा० प्र० निर्गुणं निष्कलं ब्रह्म, फलकोऽस्ति ममोत्तमः ॥७४॥

श्रु० सं० कस्मैचिद्रणाय सन्जीकृतः प्राणतुरङ्गमः। अधुनायुधानि सन्न-[ह्य]ानि तत्र परहेतिपातान् विफलयितुं फलकमेवादौ निरूपयन्ति निर्गुणः [फ]लक इति। निर्गुणः=परेशः फलकः कार्यः इत्यर्थः। आसीद्भारताजौ

विजयविजयायालं फलकीकृतकलेवरः कोऽपि निर्गुण एव । श्रूयते ऽपि "इन्द्रस्य वरूथमसि" (५।६।१४) इति । हे परमात्मन् ! त्वम् इन्द्रस्य = अर्जुनादिजीवस्य वरूथम् = फलकोऽसीत्यर्थः । "वरूथं चर्मवेश्मनो" रिति मेदिनी । स निर्गुण— इत्यत्र किमु वक्तव्यं स्वयमेव गायति "त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् । मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ॥ (गी० ७।१४) इति । व्याचष्टे निर्गुणमित्यादि । स्पष्टम् ॥४६॥

मू० गुरुशब्द कमान ॥५०॥

सं० प्र० गुरुशब्दः कार्मुकम् ॥५०॥

भा० प्र० कुर्वन्नेव यजुर्मन्त्रो, वास्तवं कर्म बोधिता ।
कार्मुकं गुरुशब्दोऽयं, प्रभवन् कर्मणे यतः ॥७५॥

भ्रु० सं० फलकेन सार्धं स्कन्धारोपितं कार्मुकं निरूपयन्ति गुरुशब्दः कार्मुकमिति । व्याचष्टे कुर्वन्नेवेत्यादिना । इदमैदम्पर्यम्—कर्मणे प्रभवतीति कार्मुकमिति व्युत्पत्त्या कर्मबोधको भगवान् वेदो झटित्यवतरति चित्ते वेदविदाम् । स एवात्र गुरुशब्दभाग्, भवति हि गुरूणां गुरोरीश्वरस्य निःश्वासः । सोऽयं "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे" ॥ (यजु० ४०।२) इति । अयमर्थस्तु–इह = संसारे कर्माणि वेदोदितश्रेयःसाधनानि कर्माणि कर्तव्यबुद्ध्या कुर्वन्नेव शतं समाः=शतवर्षपर्यन्तं जनो जिजीवि-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

येत्=जीवितुमिच्छेत् । एवम्=अनासक्तभावेन कर्माणि कुर्वति त्वयि नरे=न रमते कर्मफल इति नरोऽनासक्तस्तस्मिन् कर्म न लिप्यते=जन्म-मरणप्रवाहे त्वां न प्रक्षेप्स्यति । इतोऽन्यथा=एतदनासक्तियोगाद्भिन्नं वर्त्म नास्ति येन कर्मलेपो न भवेदिति ॥५०॥

मू० अकल संजोह ॥५१॥

सं० अ० अकलः सन्नाहः ॥५१॥

भा० प्र० ब्रह्म यदष्टमे काण्डे, वर्माऽऽह्याथर्वणी श्रुतिः ।
अविद्यायाः परित्रात्, तनुत्रं विद्ध तद्दृढम् ॥७६॥

स्व० सं० सामान्यानां सांयुगीनानां तनुत्रं केवलं तनु त्रायते हेतिपात-मात्रान्न मृत्योः । अस्माकं तु तन्मृत्योरपि रक्षतीति विशेषमाहुराचार्या **अकलः सन्नाह** इति । अकलः परमात्मा "निष्कलमिति" श्रुतेः । स एव सन्नाहः=उरश्छदः "जगरः कङ्कटो योगः संनाहः स्यादुरश्छदः" इति त्रोपाली । अत्र श्रुतिं संवादयति प्रसादिनीकृद् ब्रह्मेति । **"यत् ते नियानं रजसं मृत्यो अनवधर्ष्यम् । पथ इमं तस्माद् रक्षन्तो ब्रह्मास्मै वर्म कृण्मसि"** (अथ० ८।२।१०) इति श्रुतिः । हे मृत्यो ! यत् ते अनवधर्ष्यम् अनवरोधनीयम् रजसम्=राजसं नियानम्=अयनं तस्मात्पथ इमम्=जीवं रक्षन्तो वयम् अस्मै=जीवाय ब्रह्म वर्म कृण्मसि=कुर्म इत्यर्थः । ऋगप्याचष्टे "त्वमग्ने प्रयतदक्षिणं नर वर्मेव स्यूतं परिपासि विश्वतः" (ऋ० ६।७५।१६) इति । हे अग्ने !=परेश ! त्वं प्रयत-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दक्षिणम् = दान्युपासकं नरं स्यूतं वर्मेव विश्वतः = सर्वतः परिपासीत्यर्थः । एवं "ब्रह्म वर्म ममान्तरम" (ऋ० ६।७५।१९) "परिवृतो ब्रह्मणा वर्मणाहम" (अथ० १७।१।२८) इत्यादावापि द्रष्टव्यम् ॥५१॥

मू० प्रीति के बाण ॥५२॥

सं० अ० प्रीतिर्बाणः ॥५२॥

भा० प्र० जगति पातनीं प्रीतिं, त्यक्त्वेशे सेषुरिष्यते ।

अ० सं० अमोघं बाणं वर्णयन्ति प्रीतिर्बाण इति । अव्यवहितोपस्थितं यद्ब्रह्म तद्विषया प्रीतिरिवेह बाणस्थाने नियोजितेत्यर्थः । एतेनैव शरेण शरव्यतां नेतुं शक्यतेऽमित्रं मनः । एतदभावे न मनोजयो नतरां मोक्षः । सूक्त महर्षिणा व्यासेन "प्रीतिर्न यावत्परमेश्वरे स्यान्मुच्येत तावन्न शरीरयोगत् । शरीरयोगस्य हि मोचनार्थी परमेश्वरे प्रीतिमतश्च कुर्याद्" इति । ननु कथमयं बाणस्तव गुरुशब्दकार्मुकेण सन्धीयते ? प्रत्यासत्त्यभावात् । कथं च मनसोत्पन्नो मनो हनिष्यतीति चेदत्र शृणु—पुरस्ताद् गुरुशब्देषु श्रद्धानाम्नी प्रीतिरासीदुक्तधनुःसंहितो बाणः सैव प्रीतिस्तच्छब्दोदितानासक्तकर्मप्रयोगपदवीं व्रजन्ती मध्येमार्गमुत्पतन्मार्गणः । सैव सफलेन कर्मणा साकं समर्पिता परेशचरणेषु तद्रुचमावहन्ती सती विपाकः शरः । स तु "जहि शत्रु" मित्याज्ञावेगभरस्त्वरितं परावृत्तः ।

प्रत्यावृत्त्य स विव्याध, मनोव्याधं सबान्धवम् ।
अहो बत ! यतो जातो, जातवेदा ददाह तद् ॥इति॥

सर्वमेतन्मनसि कृत्वा व्याचष्टे जगतीत्यादि । सुप्रसन्नम् ॥५२॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० अकल की बरछी ॥५३॥

सं० अ० अकला वरच्छी ॥५३॥

भा० प्र० वरच्छीमकलां कुर्या,—च्छयत्यरीन् साधु सा यतः।
विशिनष्टि क्रियामत्र, वरो न कर्मगोचरः ॥७७॥

श्रु० सं० शक्तिः सूच्यते अकला वरच्छीति। अकला=न कला अधिका यस्याः सा परैकपरायणा बुद्धिः सैव वरं छ्यतीति वरच्छी=शक्तिः। एतया सात्विकं मनश्छित्वा सत्त्वेन नैसर्गिकात्मानन्दोऽनुभूयत इति हृदयम्। तथैवोपनिषत्सु श्रूयते " समुदेति परानन्दा या तनुः पारमेश्वरी। मनसैव मनश्छित्वा सा स्वयं लभ्यते गतिः ॥" (अन्न०पू० १।५३) इति। व्याचष्टे अकलामित्यादि। वरान् श्रेष्ठाँश्छ्यतीति पतितमर्थं व्यावर्तयति विशिनष्टीत्यादि। वरमिति क्रियाविशेषणं नतु क्रियाकर्मवन्तं छेद्यमाचष्ट इति भावः ॥५३॥

मू० गुणों की कटारी ॥ ५४ ॥

सं० अ० गुणाः कटारिका ॥ ५४ ॥

भा० प्र० अभ्यस्यत्वाद्गुणान् कुर्यान्मैत्र्यादींस्तु कटारिकाम् ॥

श्रु० सं० कृपाणः सूच्यते गुणाः कटारिकेति। व्याचष्टे अभ्यस्यादित्यादि। अयं भावः मैत्र्यादिगुणा अपि चित्तप्रसादनायाधेया मुमुक्षुभिः। तथा च योगानुशासने "मैत्रीकरुणामुदितोपेक्षाणां सुख

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम्" (यो० १।३३) इति। अस्य भाष्यम् "तत्र सर्वप्राणिषु सुखसम्भोगापन्नेषु मैत्रीं भावयेत्, दुःखितेषु करुणां, पुण्यात्मकेषु मुदिताम. अपुण्यात्मकेषूपेक्षाम। एवमस्यभावयतः शुक्लो धर्म उपजायते ततश्चित्तं प्रसीदति प्रसन्नमेकाग्रं स्थितिपदं लभत" इति। यथा कटारिकया शत्रुबलावलेपं संहृत्य शत्रुर्वशीक्रियते। तथा मैत्र्यादिगुणै मनोऽस्थिरता-बलमपनीय मनः स्थिरीक्रियत इति हृदयम ॥ ५४॥

मू० मन को मारि करौ असवारी ॥५५॥

सं० अ० मनो मारयित्वा कुरुध्वमश्ववारताम् ॥ ५५ ॥

भा० प्र० मनसो मारयित्वाशु, कुरुध्वमश्ववारताम् ॥७८॥
मनो ऽद्याद्यक्षवर्गस्य, नूनमत्रोपलक्षणम्।
तेनैतत्तनुदेवानां, सुपथि चालनं तथा ॥७९॥
मनसो मारण सा या, दुस्सङ्कल्पान्निवर्तना ।
तदनु शिवसंकल्पी—करणमश्ववारता ॥८०॥
एतदर्थे स्वभावो हि, गुरुणोद्घोष्यते स्फुटम्।
सूत्रे पूर्वापरीभावः, सङ्गच्छेतान्यथाकथम् ॥८१॥
मनो ऽस्तु शिवसङ्कल्पं, प्रार्थना वेद ईदृशी।
मृतमग्ने मनो मे ऽस्तु, नास्ति तस्या विरोधिनी ॥८२॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रु० सं० यमतिचिरन्तनमभिधातिनमभ्यवस्कन्दयितुमयं नाम-प्रक्खर इत्यारभ्य महासमराडम्बरसमारम्भस्तं सन्मुखमागतं मारयितुं त्वर-यन्त्याचार्या मन इत्यादि । मनो मारयित्वा अश्ववारतां कुरुध्वम्=सा-दितामासादयतेत्यर्थः । मनोनाशोऽपि मोक्षापेक्षा श्रूयते

"यत्ते यम वैवस्वतं मनो जगाम दूरकम् ।
तत्त आ वर्तयामसीह क्षयाय जीवसे ॥
यत्ते दिवं यत्पृथिवीं मनो जगाम दूरकम् । तत्ते ०-० ॥
यत्ते भूमिं चतुर्भृष्टिं मनो जगाम दूरकम । तत्ते ०-० ॥
यत्ते चतस्रः प्रदिशो मनो जगाम दूरकम । तत्ते ०-० ॥
यत्ते समुद्रमर्णवं मनो जगाम दूरकम् । तत्ते ०-० ॥
यत्ते मरीचीः प्रवतो मनो जगाम दूरकम । तत्ते ०-० ॥
यत्ते अपो यदोषधी मनो जगाम दूरकम् । तत्ते ०-० ॥
यत्ते सूर्यं यदुषसं मनो जगाम दूरकम् । तत्ते ०-० ॥
यत्ते पर्वतान्बृहतो मनो जगाम दूरकम् । तत्ते ०-० ॥
यत्ते विश्वमिदं जगन्मनो जगाम दूरकम् । तत्ते ०-० ॥
यत्ते पराः परावतो मनो जगाम 'दूरकम् । तत्ते ०- ॥
यत्ते भूतं च भव्यं च मनो जगाम दूरकम । तत्ते ०-० ॥"

(ऋ० १०।५८।१-१२) इति ।

हे जीवात्मन् क्षयाय=मनोनाशाय जीवसे=जीवन्मुक्तये तं तत् मन आवर्तयामसि=परावर्तयामि, यन्मनः वैवस्वतं यममवेक्षितुं दूरमन्त-रिक्षं, दूरं दिवं पृथिवीं, भूमिं चतुर्भृष्टिं=सर्वतो भ्रान्ततां, चतस्रः दिशः समुद्रमर्णवं, मरीचीः=मरुमरीचिचयम्, अप ओषधीः, सूर्यमुषसं, बृहतः पर्वतान्, विश्वम्=सर्वं जगत्, परावतः परा दिशः, भूतं भव्यं जगाम=परिबभ्रामेत्यर्थः ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

"यद्वो मनः परागतं यद्‌बद्धमिह वेह वा।
तद् व आवर्तयामसि मयि वो रमतां मनः॥"

(अथ० ७।१२।४) इति च।

यद् वो मनः परागतं=दूरंगतमनात्मरतमिति यावत्। इह वा इह वा बद्धम्=धनमदैश्वर्यादौ पुत्रकलत्रादौ वा सक्तमस्ति, वः तन्मनः आवर्तयामसि=समादधामि यतः मयि=परमेश्वरे रमतामित्यर्थः। स्मर्यतेऽपिच "तत्त्वज्ञानं मनोनाशो वासनाक्षयमेव च। मिथः कारणतां गत्वा दुःसाध्यानि स्थितान्यतः॥" (यो. वा. उप. ६।१।१४) इति। "स जीवति मनो यस्य मननेन न जीवति" (यो० वा० वै० १४।११) इति च।

ननु नैकरूपा मनो मृत्युरुपलभ्यते यतः "ईर्ष्यामृतं मनः" (अथ० ६।१८।२) इत्यादावशुभमर्षात्तिरूपा तन्मृत्युः।

अमर्त्योऽमर्त्येन (ऋ० १।१६४।३७ इत्यादौ नश्वरतैव मनोनिधनम्। "मनोनाश" (यो. वा. उप. ६।१।१४) इत्यादौ सत्त्वसमापत्तिरेव मनोनाशोऽतो भवति वैमत्यमत्रत्ये मनोऽत्यये कीदृशोऽयमिति। तत्राशुभवृत्तिनिवृत्तिः सात्त्विकवासनासमापत्तिश्चात्र मनोमृत्युरिति निर्णेष्यन् सूत्रं व्याचष्टे प्रसादिन्यां मनस इत्यादि। मनस इति कर्मणः शेषेत्वविवक्षायां षष्ठी तथा च मनःकर्मकमरणप्रयोजकव्यापारानन्तरं मनः कर्मकमारोहणं विधेयमिति बोध्यः। द्विधा मनसो मृत्युः साक्षाद्, इन्द्रियमृत्युप्रणाड्या च तत्र द्वितीयां विधां संग्रहीतुं मनः पदमिन्द्रियान्तरोपलक्षणं ब्रूते मनोऽत्ययादीति। संगृहीतमर्थमाह तेनेत्यादि। एतत्तनुदेवानाम्=स्थूलशरीरस्थेन्द्रियाणां सुपथि चालनमिति परम्परया मनसो मारणा तथा या मनसो दुस्सङ्कल्पान्निवर्तना सा साक्षादित्यर्थः। पूर्वव्यापारमुक्त्वाऽनन्तरमाह तदित्याद्यर्धेन। मनसि शिवसङ्कल्पासादनमेवात्र सादितेति भावः।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

उक्तार्थे गमकमाह एतदित्यादि दुःसङ्कल्पनिवृत्यात्मकेऽर्थे मरणपदस्य, शुभसङ्कल्परूपेऽर्थेऽऽश्ववारतापदस्य च स्वभावः=वृत्तिः, गुरुणोद्घोष्यते= आचार्यैः सूच्यत इत्यर्थः।

अन्यथानुपपत्तिमाह सूत्रेत्याद्यर्धेन। यदि चात्र मनसो मारणं विनाशस्तदा विनाशितं मनोऽतिनिष्णाताश्ववारसहस्रेणापि समारोढुं न शक्येतेति सूत्रस्थयो र्मारणारोहणव्यापारयोः पौर्वापर्यं भज्येतातोऽत्र मनसो मारणं दुःसङ्कल्पनिवृत्तिरेवेति निर्णयः। शेषं सुगमम् ॥५५॥

मू० विषम गढ तोड़ निर्भौ घर आया। नौबत शङ्ख नगारा बाया ॥५६॥

सं० अ० विषमं दुर्गं त्रोटयित्वा निर्भयं गृहमायम्।
भेरी शङ्खोऽनकाश्च वादिताः ॥५६॥

भा० प्र० " संसारं विषमं दुर्गं, भङ्क्त्वायं निर्भयं गृहम्।
शङ्खभेर्यादिकं वाद्यं, विजयवादिवादितम् ॥८३॥

श्रु० सं० परिपन्थिनमुन्मथ्य तद्दुर्गमपि भेदनीयं वेदनीयं चाभीप्सितं वित्तमिति तथैव नाटयन्तः शिक्षयन्त्याचार्या विषमेत्यादि। विषमं दुर्गम्= विषमगुणकं द्वैतजगद्दुर्गं त्रोटयित्वा निर्भयं गृहम्=एतन्मृन्मयं शरीरगृहं सभयं यतो हि तदप्राप्तिप्रार्थना श्रूयते "मो षु वरुण मृन्मयं गृहं राजन्नहं गमम" (ऋ० ७।८९।१) इति। हे वरुण राजन्! अहं मृन्मयं शरीरगृहं मोषुगमम=न प्राप्नुयामित्यर्थः। अतस्ततो निस्सृत्याभयमद्वैतं द्वैतोपादानं ब्रह्मागममित्यर्थः। श्रूयतेऽपि तथैव " इन्द्रस्य गृहो-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

ऽसि तं त्वा प्रपद्ये तं त्वा प्रविशामि सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सहयन्मेऽस्तितेन" (अथ. ५।६।११) इति। हे परमात्मन्! त्वम् इन्द्रस्य=ज्ञानिनो गृहोऽसि=गृहमसि। तं त्वा सर्वेन्द्रियविजयी व्यापकः सन् सर्वस्वमादायाहं प्रविशामीत्यर्थः। किञ्च "सहायमीक्षाञ्चक्रे यन्मदन्यंन्नास्ति कस्मान्नु बिभेमीति तत एवास्य भयं वीयाय कस्माद्ध्यभैष्यद् द्वितीयाद्वै भयं भवति" (बृ० १।४।२) इति। "शतं मा पुर आयसीररक्षन्नध श्येनो जवसा निरदीयम्" (ऋ० ४।२७।१) इति च। शतम्=अनेकानि आयसीः=तमआदिगुणत्रयमयानि पुरः=दुर्गाणि माम् अरक्षन्=अवारुन्धन् अध=अधुना अहं श्येनः=श्येनेव जवसा=वैराग्यवेगान्वितेन शुद्धबोधब्रह्मास्त्रेण तानि दुर्गाणि भङ्क्त्वा निरदीयम्=मुक्तोऽस्मीति भावः। जयघोषवर्जितो विजयो नातीव मनोहारीति तमपि साधयन्ति भेरीत्यादि। भगवति वेदेऽपि विजयमर्दलं निभालय उच्चैर्घोषो दुन्दुभिः" (अथ० ५।२०।१) "अपसेध दुन्दुभे दुच्छुनामित" (अथ ६।१२६।२) इत्यादौ। दुर्गनामग्राहं सूत्रं व्याचष्टे प्रसादिन्यां संसारेत्यादि। स्पष्टम्। अज्ञानशत्रोः संसारदुर्गं भिन्दन्नेव ज्ञानीन्द्रः श्रूयते "तिग्मेन वृषभो पुरोऽभेत्" (ऋ० १।३३।१३) इति। तिग्मेन=अतितीक्ष्णेन वृषभेण=आनन्दवर्षुकेण ज्ञानास्त्रेण पुरोऽभेद्=दुर्गाणि व्यदारयदित्यर्थः। आध्यात्मिकादिमार्गत्रये प्रवहन्ती भगवती श्रुतिस्त्रिजगतीमपि प्रकाशयति पावयति त्रिपथगेव गङ्गेति मा ग्रहीष्ट कांश्चनैकमेवार्थमभ्युपगमयितुमिति बोध्यम्। एवम् "आभनत्पुरः" (ऋ० १।५३।८) "आमिनान् पुर इष्णास" (ऋ० १।६३।२)। "शतं शम्बरस्य पुरो बिभेद" (ऋ. २।१४।२)। "न्याविध्यादलाविशस्य दृह्ला" (ऋ. १।३३।१२)। "वज्री भिनत् पुरः" (ऋ. ८।१।८) इत्यादावपि बोधनीयम्। ५६॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० गुरु अविनाशी सूक्षम वेद ।
निर्वाण विद्या अपार भेद ॥५७॥

सं० अ० गुरुरविनाशी सूक्ष्मं वेद निर्वाणविद्याऽपारभेदानाम् ॥५७॥

भा० प्र० अविनाशी गुरुः सूक्ष्मं, स्वसवेद्यं प्रपश्यति ।
सेयं श्रुतौ श्रुता विद्या, परा निर्वाणदायिनी ॥८४
विद्योभयविधा प्रोक्ता, परापरविभेदतः ।
बहुविधाऽपरा तत्र, परात्वेक त्वमाश्रिता ॥८५
श्रुतिस्तल्लक्षणं प्राह, ययाधिगम्यतेऽक्षरम् ।

श्रु० सं० अभयपदप्राप्तिरुक्ता तत्र "आचार्यस्ते गति वक्ता" (छां० ४।१४।१) इति श्रुतिं सङ्गमयन्तोऽनुपासितगुरुतां प्रतिक्षिपन्ति गुरुरविनाशी सूक्ष्म वेदेति । अविनाशिप्रख्यो ममाचार्यः सूक्ष्मम् सुसूक्ष्ममभयपदं वेद=परिपश्यति यथा श्रुतौ " यत्तद्द्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपाद नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं भूतयोनिं परिपश्यन्ति धीराः" (मु० १।१।६) इति । तथा चैतेनाचार्यचरणेनाभयपदं प्रापिता वयमिति हृदयम् । तदेतत्सूक्ष्मपदमवेक्षितुमेव पुरस्ताद् योगः प्रसाधितः । समर्यते हि "सूक्ष्मतां चान्वेक्ष्येत योगेन परमात्मनः" (मनु० ६।६५) इति । मुण्डकश्रुतिपदन्यासैर्विद्याभेदान् सूचयन्तः प्रस्तुतामुपस्तुवते निर्वाणेत्यादिना । परापराद्यारभेदानां मध्ये इयमेवात्मविद्या निर्वाणम्=मोक्षं ददातीति भावः । श्रुतिसुखेन सूत्रं व्याचष्टे अविनाशीत्यादिसार्धद्वयेन । एतेन " द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदो अथर्ववेद शिक्षा कल्पो व्याकरण निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते"। (मु० १।१।४) इति श्रुतिद्वयं व्याख्यातं वेदितव्यम् ॥५७॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० अखण्ड जनेऊ ॥ ५८ ॥

सं० अ० अखण्डो यज्ञसूत्रम् ॥ ५८ ॥

भा० प्र० अखण्डानन्द आत्मा धीः, यज्ञसूत्रमनन्तगम् ।

श्रु० सं० औदास्यदीक्षावसरे यज्ञसूत्राद्यन्यन्तः समारोप्य बाह्यानि निरस्यन्ते । यथोक्तं "यज्ञोपवीत! बहिर्न निवसेस्त्वमन्तः प्रविशे"त्यादिना नारदीयचतुर्थोपदेशे । तत्र किं केन रूपेण समारोप्यतेऽन्तरिति सूत्र्यत आचार्यैः अखण्डो यज्ञसूत्रमित्यादिभिरेकादशभिः । अखण्डः=अनन्तोऽक्षरः परमात्मा स एव यज्ञसूत्रमित्यर्थः । अन्यत्राप्युक्तं "यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत्" । 'येन सर्वमिदं प्रोतं सूत्रे मणिगणा इव । तत्सूत्रं धारयेद्योगी योगतत्त्वविशारदः" (नारदपरि० ३ ७७,७८) इति । तत्सूत्रं धारयेदिति धारणपदार्थमन्तर्भाव्य सूत्रं व्याचष्टे अखण्डानन्देत्याद्यर्धेन । ब्रह्मधारैव यज्ञसूत्रधारणमित्यर्थः । उक्तमपि " ब्रह्मभावमिदं सूत्रं धारयेद्यः सचेतनः " (नारदपरि० ३।८०) इत्यादौ ॥ ५८ ॥

मू० निर्मल धोती ॥ ५९ ॥

सं० अ० नैर्मल्यं धौतिः ॥ ५९ ॥

भ० प्र० नैर्मल्यं मनसो ज्ञेयं, धौतवस्त्रं महात्मनाम् ॥१६॥

श्रु० सं० परिधानीयमान्तरं सूत्रयन्ति नैर्मल्यं धौतिरिति । अन्तस्तलनिर्मलतैवास्माकं धौतिरित्यर्थः । यथा धौतकौशेयादिकं परिदधान्ति

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

गृहस्थाः स्वेषु महत्त्वं लभन्ते एवं महात्मसु निर्मलमानसास्तत्रभवन्तः श्रौतमुनयः सत्कारमासादयन्तीति भावः। अप्रसक्तत्वाद्योगधौतिरत्र नोपात्तेति ज्ञेयम् ॥ ५९ ॥

सू० सोहं जाप सच माल पिरोती ॥६०॥

सं० अ० सोहं जपः। सत्या माला प्रोता ॥६०॥

भा. प्र. यदग्ने! स्यामहं त्वं त्वं घास्या अहमृचः श्रुतेः।
आम्नानमनिशं माला प्रोता सत्या हि वैदिकी ॥८७॥
तदाम्नानफलीभूत—सत्याशिषः प्रसादतः।
सोहंजपस्य माला मे प्रोता सत्या हि याजुषी ॥८८॥

अ० सं० मालामन्त्र उपदिश्यते सोहमिति। श्वासप्रश्वाससूत्रप्रोता सोऽहमिति मन्त्रराजमणीनां माला। सत्या ह्येयं तत्त्वदृशां सिद्धा, साध्या मुमुक्षूणामिति भावः। उक्तं हि "हकारेण बहिर्याति सकारेण विशेत्पुनः हंसहसेति मन्त्रोऽयं जीवो जपति सर्वदा"। न केवलमियं माला भगवता वेदस्य शिरस्येव शोभतेऽपि तु हृदये ब्रह्मीतीत्याश्रावयति प्रसादिनीकारः यदग्न इत्यादिना। "यदग्ने स्यामहं त्वं त्वं वा घा स्या अहम्। स्युष्टे सत्या इहाशिषः" अहं त्वं स्याम् त्वं वा अहं स्यास्तदा त आशिष इह सत्याः स्युरित्यन्वयः। अयं भावः—अग्निरिह ब्रह्मेत्यसकृदावेदितम्। तथा च ब्रह्म बुभूषुर्जीवस्तद्गतिं प्रतिपलं प्रार्थयते "यदग्ने स्यामहं" "अग्नय स्याम" (ऋ० ८।१९।७) "वयं भगवन्तः स्याम" (ऋ० ७.४१।४,५)। "मा मा ब्रह्म निराकरो-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

दृ" (केनो०) इत्यादिभिः। यदा पुण्यपरिपाकात्पश्यति स्वरूपं तदा तारं ब्रवीति "अपश्यमस्य महतो महित्वममर्त्यस्य मर्त्यासु विक्षु" (ऋ० १०।७९।१) मर्त्यासु विक्षु = प्रजासु अस्य महतोऽमर्त्यस्य = अविनाशिनो ममेश्वरस्य महित्वम् = महिमानमपश्यमिति तदर्थः। अन्यमप्यामन्त्रयति "य ईं चिकेत गुहा भवन्तमा यः ससाद धारा मृतस्य" (१।६७।४) इति। यो गुहाभवन्तम् = हृदिसन्तम् ईम् = इमं चिकेत = जानाति स ऋतस्य धाराम् = सत्यस्य मालाम् आससाद = प्राप्नोतीत्यर्थः। अतः सत्यमुक्तं सत्या मालेति। सूत्रं योजयति सोहमित्यादिनार्थेन। याजुषी = यजुर्वेदविदिता "योऽसावसौ पुरुषः सोहमस्मि" (यजु० ४०।१६) इत्यत्र ॥६०॥

मू० सिखा गुरुमन्त्र गायत्री हरिनाम।
निश्चल आसन कर विश्राम ॥६१॥

सं० अ० शिखा गुरुमन्त्रो गायत्री हरिनाम।
निश्चल आसने कृत्वा विश्रामं जपेत् ॥६१॥

भा० प्र० शिखा मे गुरुमन्त्रो या, गायत्री हरिनामगी।
श्रौतं मन्त्रं जपेच्चेसं, विश्रम्य निश्चलासने ॥८९॥

पार्थक्याद् गुरुमन्त्राणां, ये द्विषन्ति परस्परम्।
साम्प्रदायिंविद्वेषं, तेषां तं घातुको गुरुः ॥९०॥

मन्त्रान्तरोपदेशी चेत, प्रत्युत तं प्रवर्धयेत्।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रु० सं० शिखां निरूपयन्ति शिखा गुरुमन्त्र इति। शिखा गुरुमन्त्ररूपेणान्तस्तिष्ठतीत्यर्थः। गुरुमन्त्रमाहुः गायत्रीति। गायत्रीं विवरीतुं विशिंषन्ति हरिनामेति। हरिशब्दनीत्यर्थः। प्रसङ्गात्तज्जपविधिमाहुः निश्चलेत्यादि। निश्चल आसने विश्रामं कृत्वा=सुख स्थित्वेत्यर्थः। एतेन पातञ्जलसूत्रमेव व्याख्यातं वेदितव्यम्। तदिदं 'स्थिरसुखमासनम्' (यो० सू० २।४६)। "स्थिरम्=निश्चलं यत् सुखम्=सुखावहं तदासनम्" (तत्त्ववै० २।४६) इति तट्टीका। व्याचष्टे शिखेत्यादि। नन्वाचार्या नूतनं मन्त्रान्तरं किमिति नोपादिदिशु र्यथान्ये साम्प्रदायिका इत्यत आह पार्थक्यादित्यादिना सार्धेन। मिथो विद्विषता साम्प्रदायिकानां द्वेषमूलं मन्त्रपार्थक्यमपनेतुमेवाचार्याः श्रौतं समुपादिशन्नमन्त्रान्तारमिति भावः। गुरुपरम्परया सरहस्ये सप्रकारे प्राप्तव्ये मनौ मौनमिहाश्रीयते ॥६१

सू० तिलक सँपूर्ण ॥६२॥

सं० अ० तिलकं संपूर्णः ॥६२॥

मा० प्र० चन्दनतिलकेनाशु, वासेन वास्यते तनूः।
वासितं ब्रह्मणा विश्व—मुचितं ह्यत्र रूपणम् ॥६१॥

श्रु० सं० आन्तरं तिलकं रचयन्ति तिलकं सपूर्ण इति। मस्तिष्के सम्पूर्णस्य परमात्मनश्चिन्तनमेव ललाटस्थं तिलकमित्यर्थः। तेलति गच्छति सर्वमिति तिलकम्=सर्वगम्। सर्वगं चैकं ब्रह्म, श्रूयते हि—"तेनेदं पूर्णं पुरुषेण सर्वं" (श्वे० ३।९)। "पुरुष एवेदं सर्वम्" (ऋ. १०।९०।२)। "आपप्रौ पार्थिव रजः" (ऋ. १।८१।५) इति। पार्थिवं रजः=पृथिव्यादे र्जगतः प्रतिकणम् आपप्रौ=आपूर्य

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

स्थितः परमात्मेत्यर्थोऽन्त्यचरणांशस्य । इत्थमुद्देश्यविधेययोरभेदमालोच्यैव रूपकरचनावैचित्र्यमाचार्याणामिति ज्ञेयम् । वासनासाम्येनाप्युक्तं रूपकमिति व्याचष्टे चन्दनेत्यादि । चन्दनादिमयेन तिलकेन केवलं कलेवरमेव वास्यते ब्रह्मरूपेण तेन तु भुवनत्रयमिति विशेष इतिभावः ॥६२॥

मू० तर्पण यश ॥६३॥

सं० श्र० तर्पणं यशः ॥६३॥

भा० प्र० नृवर्णिसुरभूतानां, पितॄणा भोजनादिना ।
तर्पण वित्त तन्मे य, दीशचिन्तनज यशः ॥६३

श्र० सं० अन्तरारोपितान् पञ्चमहायज्ञानाहुः तर्पण यश इति ! तर्पणम्=पितृयज्ञः । एतेनान्ये शेषा उपलक्ष्यन्ते । ते च स्मृताः "अध्यापनं ब्रह्मयज्ञः, पितृयज्ञस्तु तर्पणम । होमो दैवो, बलिर्भौतो, नृयज्ञोऽतिथिपूजनम् ॥" (मनु० ३।७०) इति । एते चावश्यमनुष्ठेया पञ्चसूनापापापनोदनाय गृहमेधिभिस्तथा च शास्त्रम्—पञ्च क्लृप्ता महायज्ञा प्रत्यहं गृहमेधिनाम् " (मनु० ३।६६) इति । " पञ्च वै एते महायज्ञाः " (तै० आ० २।१०) इति च । ते च ब्रह्मचिन्तनजे यशसि समारोप्यन्ते श्रौतमुनिभिः । श्रुतावप्येवं " यशो हविर्वर्धतामिन्द्रजूतं सहस्रवीर्यं सुभृत सहस्कृतं ।" (अथ० ६।३६।१) इति । इन्द्रजूतम्=ब्रह्मचिन्तनजं सहस्रवीर्यम्=अनन्तसामर्थ्यं सुभृतं यशो हविः=यशोरूपं हविष्पञ्चकं वर्धतामीत्यर्थः । एतत्तथ्यम्—पञ्चमहायज्ञसम्पाद्यं सम्पाद्यते प्रोक्तेनैव यशसा । सङ्गिरन्ते हि लोका—" स्नातं तेन समस्त तीर्थसलिले सर्वा च दत्तावनि, यज्ञानां च कृतं सहस्रमखिला

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

देवाश्च सम्पूजिताः। संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ, यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥" इति। सर्वमेतत्समाकलय्यैव व्याचष्टे नृवर्णीत्यादि। नृवर्णिसुरभूतानाम् = अतिथिब्रह्मचारिदेवप्राणिनामित्यर्थः ॥६३॥

मू० पूजा प्रेम ॥६४॥

सं० अ० पूजा प्रेमा ॥६४॥

भा० प्र० बाह्या पूजैकदेशस्य, तत्तोषणी भवेन्नवा।
विश्वरूपे विभौ प्रेम, पूजा स्याद्विश्वतोषणी ॥६३॥

अ० सं० पूजां बाह्यामन्तरारोपयन्ति पूजा प्रेमेति। भगवतश्चरणेषु प्रेमैव पूजेत्यर्थः। "दर्शने स्पर्शने वापि श्रवणे भाषणेऽपि वा। हृदयस्य द्रवत्वं यत् तत्प्रेम इति कथ्यते", इति सामान्यप्रेमपरिभाषा। "अर्चा शक्राय शाकिने" (ऋ० १।५४।२) । अर्चत प्रार्चत प्रियमेधासो अर्चत" (अथ० २०।९२।५) इत्यादिश्रुतिभिर्विहिता व्यापकस्य दूरस्थस्य वा देवस्य धूपदीपादिक्रियापरम्परात्मिका पूजा न सुशका। इयं प्रेमरूपा त्वप्रतिहतप्रयोगा सर्वत्र। पश्य दूरस्थस्य प्रेमपूजाम् "अहो साहजिकं प्रेम दूरादपि विराजते। चकोरनयनद्वन्द्वमाह्लादयति चन्द्रमा" इति। किञ्च बाह्यपूजां सम्पादयितुं न समे समर्थाः प्राणिनः। इमां चानुतिष्ठन्तः परमेशमश्नुवते, तथा च स्वयमभ्युपैति भगवान् भागवते "केवलेन हि प्रेम्णैव गोप्यो गावो नगा मृगाः। येऽप्यन्ये

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मूढधियो नागाः सिद्धा मामीयुरञ्जसा" (११।१२।८) इति । नगाः=यमलार्जुनादयः । नागाः=कालियादयः । अतः प्रेमपूजा विजयतेतराम् । व्याचष्टे प्रसादिनीकारः बाह्येत्यादि । सन्दिग्धफला बाह्या पूजा आन्तरी तु निस्सन्दिग्धाभीष्टफलेति हृदयम् ॥६४॥

मू० भोग महारस ॥६५॥

सं० अ० भोगो महारसः ॥६५॥

भा० प्र० ब्रह्मभूतेन वै ब्रह्म, भुज्यते रस्यते यतः ।
महारसः स भोगो मे, भव्यो विश्वविलक्षणः ॥६४॥

अ० सं० उक्ता देवपूजा नैवेद्यमन्तरा न सम्भवतीत्यतो नैवेद्यमाहुः भोगो महारस इति । महारसो=ब्रह्मरसः "रसो वै स" इति श्रुतेः । स एवात्र पक्वं नैवेद्यं वेद्यम् । वेदयति भगवान् वेदोऽपि "ब्रह्मौदनं विश्वजितं पचामि शृण्वन्तु मे श्रद्दधानस्य देवाः" (अथ० ४। ३५।७) इति ब्रह्मरूपौदनं पचामि, पक्वं देवेभ्यो निवेदयामि, मम श्रद्धालोरिदं नैवेद्यं देवाः शृण्वन्तु=स्वीकुर्वन्त्वित्याशयः । स एव रसो भोगो यतस्तेन भुज्यते तदर्थमेव पाकः कृतः, श्रूयते हि "यं पपाच ब्रह्मणे ब्रह्म पूर्वे" (अथ० ४।३५।२) इति । तदेव प्रसादरूपेणानुभुज्य भक्तास्तरन्ति मृत्युपारावारम्, तथा च श्रुतिः "यस्मात्पक्वादमृतं सम्बभूव यो गायत्र्या अधिपतिर्बभूव । यस्मिन् वेदा निहिता विश्वरूपास्तेनोदनेनातितराणि मृत्युम्" (अथ० ४।३५।६) इति ॥ स्पष्टोऽर्थः । महेति

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

विशेषणेन सर्वे प्राकृता रसा रसाभासा ध्वनिताः । स्मर्यते हि "ब्रह्मरसः स्वादुतमो ह्युत्तमे पूर्ण आत्मनि । इन्द्रैश्वर्यमतः क्षुद्रं का कथेतरभूपतेः (कपिलगी० ५।८६) इति । तन्त्रेऽप्युक्तम् "सारस्तु योगिभिः पीतस्तक्रं पिबन्ति पण्डिताः" (ज्ञान सं० तं० ५) इति । व्याचष्टे ब्रह्मभूतेनेत्यादि । प्रसन्नं पद्यम् ॥६५॥

मू० निर्वैर सन्ध्या । ६६ ।

सं० अ० निर्वैरता सन्ध्या ॥ ६६ ॥

भा प्र० निर्वैरता हि सन्ध्या मे, पापपुञ्जप्रणाशिनी ।

अ० सं आभ्यन्तरं सन्ध्याकृत्यमाहुः निर्वैरता सन्ध्येति । निर्वैरतासम्पादनमेव मुनीनां सन्ध्यानुष्ठानमित्यर्थः । व्याचष्टे निर्वैरतेत्यादि । अयं निष्कर्षः "पूर्वां सन्ध्यां जपँस्तिष्ठन्नैशमेनो व्यपोहति । पश्चिमां तु समासीनो मलं हन्ति दिवाकृतम् । ॥" (मनु० २।१०२) इत्यादिशास्त्रप्रमाणान्मलं क्षालयितुं पवित्रतां परिप्राप्तुं च सन्ध्याकृत्यमिति संप्रतीयते । तदेतत्फलं "अनमित्रं नो अधरादनमित्रं न उत्तरात् । इन्द्रानमित्रं नः पश्चादनमित्रं पुरस्कृधि ॥" (अथ० ६।४०।३) इति जञ्जप्यमाना मुनयो निर्वैरतासम्पादनात्सम्पादयन्ति । न केवलमात्मानमेव पुनरन्यानपि तु निखिलं जगतीतलम् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

किमत्र मानेन यदा निर्वैरान् मुनीननुव्रजति व्रजवल्लभोऽपि भगवान् स्वकं पावयितुं, तथा च भागवते वक्ति स्वयं "निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम्। अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः ॥" (११।१४।१६) इति ॥ ६६ ॥

मू० दर्शन छापा ॥ ६७ ॥

सं० श्र० दर्शनं छापाः ॥ ६७ ॥

भा० प्र० सर्वभूतेष्वहद्भाव, आत्मनि भूतभावना ।
इति मे दर्शनं छापा, निगमागमसङ्गतः ॥ ६५ ॥
छयत्यविद्यां विलासान्ता, मागामिन्याश्च पात्यपि ।
क्विबन्तच्छयतिपातिभ्यां, छापास्त्वन्वर्थकाऽत्रवै ॥ ६६ ॥

श्रु० स० चक्रादिलाञ्छनान्यन्तरङ्कर्यान्त दर्शनं छापा इति । परमात्मदर्शनमेवास्माकं चक्रादिमुद्रणमित्यर्थः । "चक्रिणं तु मृतं दृष्ट्वा, यमदूतः पलायते । त्वरितं हरिदूतस्तं, लोकं नयति चक्रिणः ॥" इति वदन्तः केचन तत्र भवन्तः श्रद्धालवो यथा मुद्राङ्कनान्मुक्तिं मन्यते. तथा "क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे"—इतिश्रुतिवद्धादराः श्रौतमुनयो भगवद्दर्शनादेवापवर्गं समामनन्तस्तद्दर्शनप्रमोदरसावेदनं श्रौतं रागं सगर्वं गायन्ति "दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि। एता जुषत मे गिरः" (ऋ० १। २५।१८)। " अपश्यमस्य महतो

महित्वममर्त्यस्य मर्त्यासु विक्षु" (ऋ० १०।७६।१) इति। विश्वदर्शतम्=विश्वरूपे दर्शनीयं देवं दर्शम् = अपश्यं नु=निश्चयेन क्षमि=हृदयभूमौ रथम्=रममाणम् अधिदर्शम्=साक्षादपश्यम् एता में गिरो जुषत=इमा मेस्तुतयस्तेन स्वीकृताः॥ मर्त्यासु=अनित्येषु विक्षु=प्रविष्टमस्य महतो देवस्य महित्वम्=नित्यव्यापकसत्तामपश्यमिति तदर्थः।

व्याचष्टे सर्वेत्यादि। "यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न विजुगुप्सते" (वा० यजु०-४०।६) इत्यादि निगमः। सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥ (गी० ६।२९) इत्यादिश्चागमोऽत्र बोध्यः॥ ६७॥

मू० वाद विवाद मिटावे आपा ॥६८॥

सं० अ० वादविवादौ मर्दयेदात्मनः ॥ ६८॥

भा० प्र० अहन्ताममतायुग्मं नामरूपद्वयं तथा।
हित्वैतद्गोचरौ वादविवादौ स्यात्स्वयं सुखी ॥६७॥

अ० सं० कृतं प्रत्येकं बाह्यस्य वस्तुनस्त्यागेन सागरे नदेनेव सर्वविवादास्पदे नामरूप एव परित्याज्य इत्युपसंहरन्ति वादेत्यादि। आत्मनः वादविवादौ=सर्वाहन्ताममतामूलस्रोतस्स्वरूपौ नामरूपभेदौ द्वौ मर्दयेत्=परि-

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

त्यजेदित्यर्थः । अयमत्र सारः—अस्त्यादिरूपत्रयरूपरत्नाकरं ब्रह्म प्रविविक्षुरयं जीवनदः श्रौतदान्त्यां तटीमासाद्य व्युदसनीयं रूपद्वयं व्युदस्यन् समे समानाभिहारतामेति चिराय । तस्यान्तिमामिदं पदद्वयं "वादविवादौ मदितौ" इति । कृतकृत्योऽभूदयम् । आसीदयमभिलाषश्चिरात् तथा चायं मन्त्रः "स्वाग्नयो वो अग्निभिः स्याम सूनो सहस ऊर्जां पते (ऋ० ८।१६।७) इति । अस्यार्थः हे सहसः सूनो=बलस्य पुत्र ! ऊर्जां पते=अन्नपते ! अग्निभिः=तव पिशङ्गवासोभिः श्रौतमुनिभिः साकम् अग्नयः=श्रौतमुनयः सुस्याम=सुभवेमेति । व्याचष्टे अहन्तेत्यादि । व्याख्यातप्रायम् ॥ ६८ ॥

मू० पीत पिताम्बर मन मृगछाला ॥६६॥

सं० अ० पीते पीताम्बरे मनो मृगत्वक् ॥६६॥

भा० प्र० य एषोऽभ्यन्तरादित्ये, दृश्यते ना हिरण्मयः ।
पीतोऽतः सर्व आभासी, छान्दोग्याद्यप्रपाठके ॥६८॥
भगवद्रूपमर्कस्थं, पीताम्बरमतिस्फुटम् ।
तस्मिन्निवेशितं चेत-स्तदस्ति मे मृगाजिनम् ॥६६॥

श्रु० सं० पूर्वाश्रमाचिन्हानि निरस्तान्यधुनोदासीनमुनिभिर्धारणीयानि प्रस्तूयन्ते । तानि द्विविधानि १—अन्तर्धारणीयानि, २—बहिर्धारणीयानि च । तत्रान्तिमानि तोड़ाचूडेत्यत्र वक्ष्यन्ते । अन्तरङ्गत्वादादावाद्यानि प्रवदनीयानि । तेषु पूर्वमुक्तानि स्मार्यन्ते सूत्राभ्यां पीते पीताम्बरेत्यादि

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

द्वाभ्याम् पीते पीताम्बरे भगवति लग्नं मनः=भक्तिवृत्त्या परिणतं मनो मृगत्वक्=मृगाजिनमित्यर्थः। एतेन "भक्तिर्मृगार्ना" त्यत्रोक्तं स्मारितं भवति। श्रुतिमुखेन सूत्रं व्याचष्टे य एष इत्यादिना। "अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः" (छा० १।६।७) इत्यानुपूर्वी मन्त्रस्य। छान्दोग्यग्रहणमन्येषामप्युपलक्षणम्। ते चान्ये "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्" (वा० यजु० ४०।१७) "वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्" (वा० यजु० ३१।१८)। "बिभ्रद् द्रापिं हिरण्ययं वरुणो वस्त निर्णिजम्। परिस्पशो निषेदिरे" (ऋ० १।२५।१३) इत्यादयः। हिरण्मयम्=सुवर्णमयम् द्रापिम्=चोलकं बिभ्रद् वरुणः=वरणीयः परमात्मा निर्णिजम्=शुद्धं तेजस्वि वस्त्रं वस्ते=परिधत्ते तस्य स्पशः=दूताः परिनिषेदिरे=परितः स्थिताः सन्तीत्यर्थः। तस्मिन्निसर्गसुन्दरेऽर्पितं मनो मे तन्मृगाजिनमिति भावः। पूर्वोक्तस्य तस्य परामर्ष्टुमिह प्रसादिन्यायं तत्पदम्॥ ६६॥

मू० चीत चितम्बर रुण झुण माला॥७०॥

सं० आ० चित्ते चिदम्बररणरणनं माला॥ ७०॥

भा० प्र० अत्रस्थाम्बरशब्देना—काशस्य शब्दनं यतः।
माळा निरन्तरं चित्ते, चिदाकाशस्य चिन्तनम्॥१००॥

श्रु० सं० प्रोक्ता माळा स्मार्यते चित्त इत्यादि। चित्ते चिदम्बरस्य=चिदाकाशस्य परमात्मनो रणरणनम्=जञ्जपनमित्यर्थः। एतेन

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

"सोहं जाप" इत्यत्रोक्ता सत्या माळा स्मारिता भवति । अत्रत्येऽम्बर-शब्दे वस्त्रादिवचनताभ्रमं वारयन् सूत्रं व्याचष्टे अत्रेत्यादि । चिदाकाशस्य चिन्तनमिति । सोऽहमितिरूपेण चिन्तनमिति भावः ॥ ७० ॥

मू० बुद्धि बघम्बर कुलह पोस्तीन ।
खौस खड़ावां इह मति लीन ॥७१॥

सं० अ० बुद्धि र्व्याघ्राम्बरं कुळायो ळोमशाजिनं
पादत्राणे पादुके चेयं मति ळीता ॥ ७१ ॥

भा० प्र० व्याघ्राम्बरं च तोप्युचा, सहरोमत्वगम्बरम् ।
पादुके काष्ठचर्मीये, बुद्धिरेव चिदात्मनि ॥ १०१ ॥

श्रु० सं० अनुक्तान्यन्तश्चिह्नान्याहुः बुद्धिरित्यादि । बुद्धिः = ऋतम्भरा प्रज्ञा । नितान्तैकान्तनिवासिना श्रौतमुनीनामियं बुद्धिर्नान्यसाधारणी भवितुमर्हत्यपितु परेशप्रकाशिका श्रुतिप्रसिद्धैव "उपह्वरे गिरीणां सगथे च नदीनां धिया विप्रो अजायत" (ऋ० ८।६।२७) इति । गिरिगुहासु सरित्सङ्गमादिषु च मुनिर्धिया परेशः प्रकाश्यत इति भावः । तथा चेयमेव बुद्धि र्व्याघ्राम्बरम् = व्याघ्राजिनम् । कुळायः = कुळायवत्कुळायो, यस्मिन्न्यग्भूते कुळम = शिरोवच्छिन्नं कळेवरमयते तत्, शिरस्कमिति यावत् । लोमशाजिनम् = शीतनिवारणाय धारणीयश्चर्मविशेषः । पादत्राणे = चर्मनिर्मिते पादुके = दारुघटिते । व्याचष्टे व्याघ्रेत्यादि । तोप्युचा = उन्नता तोपी 'कुळाह' — इतिख्याता । शेषमवदातम् ॥ ७१ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० खौस खडावां इह मति लीन ॥७२॥

सं० अ० खौसान् खडयामि । इयं मति लींना लाता वा ॥ ७२ ॥

भ० प्र० विनापि प्रत्ययं लोपः, पूर्वोत्तरसुबन्तयोः ।
अतोऽत्र कोशशब्देन, पञ्चकोशा उदाहृताः ॥१०२॥
स्वार्थेऽणि च तथा वृद्धौ, कौश इत्यभिधीयते ।
प्राकृते प्राकृतं सूत्रं, "शषोः स" दन्त्यसो मतः ॥१०३॥
अनुप्रासस्य लोभेन, द्वितीयो वर्ण उच्यते ।
भवमतिर्विलीना मे, पूर्वोदितविचारतः ॥१०४॥
परमाथमतिर्लाते, त्यावृत्यार्थद्वयं मतम्

अ० स० अर्थान्तरविवक्षया खौसेत्यादिमूलभागमावर्त्यान्यथान्वव-दन् तत्र भवन्तः श्रीप्रियतमदासचरणास्तदाशयं प्रकाशयति प्रसादिनीकारो विनापीत्यादिभिस्त्रिभिः । अयमत्र संग्रहः—पञ्चकोशनुबोधयिषया संक्षिप्तं खौसपदं प्रयुक्तम् । तत्प्रकारश्च—पञ्चपदलोपे कोशपदात्स्वार्थेऽणि वृद्धौ च कौश इति । "शषोः स" (२।४४) इति प्राकृतसूत्रेण तालव्यस्य दन्त्ये कौस इति । अग्रिमेणानुप्रासलिप्सया खौस इति प्रयुक्तम् । एवं यावदुक्तं भवति पञ्चकोशा इति तावदुक्तं भवति खौस इति । तथा चायं सूत्रार्थः— खौसान्=पञ्च कोशान् खडयामि=अखण्डयं ततो म इयं मतिः=अनात्मन्यात्मबुद्धिर्विलीनेति । कथमनात्मन्यात्मबुद्धिस्ते विलीनेत्यस्य केनचनपृष्टस्योत्तरमेतत्सूत्रमित्यवसेयम् । इयं मतिरित्यस्य परमार्थमतिरित्यर्थो यदा, तदा निराहु र्लाता वेति । तदेवाह प्रसादिन्यां परमार्थेत्यादि । परमार्थ-मतिः=अहं ब्रह्मास्मीति दृढनिश्चयः ॥ ७२ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मू० तोड़ा चूड़ा और जँजीर ।
लै पहिरै साधु उदासी धीर ॥
जटा जूट मुकुट सिर होइ ।
मुक्ता फिरे बन्ध नहि कोइ ॥७३॥

सं० अ० तोड़ां चूड़ां च शृङ्खळां परिदधीत साधुरुदासी धीरः ।
जटाजूटमुकुटः शिरसि स्यान्मुक्तो वा विचरेद् बन्धो न हि कोऽपि ॥ ७ ॥
भा० प्र० तोड़ादिकमुदासीनो, जटाजूटं च धारयेत् ।
यत्किञ्चिदिष्टवेशो वा, विचरेन्मुण्डमुण्डितः ॥ १०५ ॥
श्रु० सं० तानीमानि बहिर्धारणीयानि चिह्नान्याहु:—तोड़ेत्यादि ।
तोड़ा = जटाबन्धनी रज्जुः । चूड़ा = तोड़ाबद्धोर्मिका । तोड़ादिधारणे स्वा-
तन्त्र्यमाहुः—मुक्तोवेत्यादि । तोड़ादिकं धारयेन्मा वा । जटाभिरळङ्कुर्या-
त्परमहंसो वा मुण्डयेन्नास्त्यत्र हठः । श्रूयते ह्यभितथा भगवति वेदे ।
तथा हि—"नमः कपर्दिने च व्युप्तकेशाय च" (वा० यजु०
१६।२९) इति । ऋच्यपि "दिव वराहमरुषं कपर्दिनं त्वेषं रूपं
नमसा नि ह्वयामहे । हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म
छर्दिरस्मभ्यं यंसत" (ऋ० १।११४।५) इति । वराहम् = सात्वि-
काहारम् अरुषम् = अरोषणं त्वेषम = ज्ञानिनं रूपम = सुन्दरं कपर्दि-
नम् = जटाभिस्तापसं दिवः = परमात्मनः सकाशात नमसा = सत्कारपूर्वक
निह्वयामि = प्रार्थयामि । प्रयोजनं वक्ति हस्तेत्यादि । यतो हि स हस्ते
वार्याणि भेषजा बिभ्रद् = भवरोगनिवारकं महौषधं हस्तामळकवद्
धारयन्नस्मभ्यं शर्म वर्म = ब्रह्मवर्म छर्दिः = प्रकाशं यंसत् = समुपदिश-
तीत्यर्थः । व्याचष्टे तोड़ेत्यादि । यत्किञ्चिदिति । अत्र यथेष्टाचरणं

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

मा शङ्किष्ट, जीवन्मुक्तो विधिनिषेधरहित इत्यत्र तत्तात्पर्यात् । तदुक्तमन्यत्रापि "क्वचिद्दुष्टः क्वचित्तुष्टः क्वचित्पापः क्वचिच्छुचिः । जीवन्मुक्तो भ्रमत्येवं नैव कुत्रापि सज्जते ॥ इति । "धर्मी क्वचिद्धर्मविपर्ययी वा विद्यावशात्तत्र न लिप्यतेऽसौ । छित्त्वात्मबुद्ध्याऽखिलदेहबन्धं स जीवन्मुक्तः क्वचिदेव दृश्यते ॥ इति कल्पे च ॥ ७३ ॥

मू० नानकपूता श्रीचन्द बोले ।
जुगत पछाणे तत्त्व विरोले ॥७४॥

सं० अ० नानकपूतः श्रीचन्द्रो ब्रवीति ।
युक्तिं परिचिनुयात्तत्त्वं विलोडयेत् ॥७४॥

भा० प्र० अनकात्मैक्यधीभक्ति—पूतात्मा ना श्रिया शशी ।
प्रतारणाद्यसंसृष्टो, ग्राह्यवाक्यो ब्रवीम्यहम् ॥१०६॥
गोभिः श्रीणीत, रे शाक ३, इत्यादौ वेदलोकयोः ।
असत्त्वे तद्धितस्यापि, तदर्थस्त्ववबुध्यते ॥१०७॥
एवं नानकशब्देन, नानकीयोऽन्वयो मतः ।
स पूतो यत्प्रभावात्स, नानकपूतशब्दितः ॥१०८॥
एतदर्थावगत्यै सो, बहुव्रीहिरिहादृतः ।
प्राचामर्थावबोधाय, युक्ता पूतपरस्थितिः ॥१०९॥
समवैतु गुरोर्युक्तिं, तत्त्वात्तत्त्वं विलोडतु ।
तत्त्वमुत्थमवाप्नोतू—दासीनः साधुरुत्थितः ॥११०॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

श्रु० सं० मुग्धास्ते सिद्धाः श्रुत्ववालङ्करणरणान सरस्वत्या जगद्-गुरूणाम् । साम्प्रतं सारं गोप्यन्तद्गवीना बोद्धुमशक्तास्तानत्याकुलान् तोषयन्तः समुपक्रान्ताभ्यस्तं तत्त्वमुपसंहरन्ति स्वपितुर्नामनिर्देशपुरस्सरं नानकपूतेत्यादि । श्रीनानकस्य पुत्रोऽयमेतद्ग्रन्थप्रणेता श्रीचन्द्रो ब्रवीति युक्तिम् = उपक्रमोपसंहारादिषड्विध तात्पर्यग्राहक लिङ्गं द्वारीकृत्य तत्त्वम् = एतन्मात्राशास्त्रप्रतिपाद्यं ब्रह्म निश्चित्य साक्षात्कुर्यादित्यर्थः । "चेतय-ध्व" मिति सूत्रेणोपक्रान्तं, "तत्वं जोड" इत्याद्यभ्यस्तमिहोपसंहृतमिति बोध्यमिति प्राचां व्याख्या । अनकपूतो ना श्रीचन्द्रो ब्रवीतीत्यन्वयमा-विष्कृत्य व्याचष्टे प्रमादिनोकारः—अनकेत्यादि । ना = नरः । श्रिया-शशी = श्रीचन्द्रः ।

नानकपूत—इत्येकपदपक्षे बहुव्रीहिं वक्ष्यत्यनन्तरं तत्र नानकपदेन तदन्वयं ग्रहीतुं सनिदर्शनं प्रकारमाह गोभिरित्यादि । "गोभिः श्रीणीत मत्सरम्" (ऋ० ९।४६।४) इति वैदिकं लुप्ततद्धितोदाहरणम् । गोभिः= गव्यैर्दुग्धैः साकं मत्सरनामकं सोमरसं पचेदिति तदर्थः । "रे शाक ३ !" इति लौकिकं तन्निदर्शनम् । तत्र रे शाकवति ३ ! इति संबोद्धव्ये केवलं रे शाक ३ ! इति प्रयुज्यते । दार्ष्टान्तिकमाह एवमित्यादि । नन्वेवं 'पूतनानक'—इतिस्यान्नत्वा 'नानकपूत'—इति, "निष्ठा" (२।२।३६) इति पाणिनीयस्मृत्या पूतपदस्य पूर्वप्रयोगप्राप्तेरित्यत आह प्राचामि-त्यादि । नानकस्य पुत्र इति प्राचामर्थः । पूतपरस्थितिः = पूतपदस्य परप्रयोगः । युक्तिमित्यादिशेषसूत्रं व्याचष्टे समवैत्वित्यादि । एतद्रहस्यमत्र—यथा प्रच्छन्नं कंचन चौरादिक जगति जिगत्रेषयिषवस्तत्पदवीमादाय व्रजन्तस्तं लभन्तेऽविलम्बम् । तथैवान्तर्हितं परं तत्त्वं परिप्रेप्सवः श्रौत-मुनयोऽन्वयव्यतिरेकादियुक्तिजातं द्वारीकृत्यानुयन्तस्तदासादयन्त्यचिरं, श्रूयते हि—"पश्वा न तायुं गुहाचतन्तं नमो युजानं नमो वहन्तम् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सजोषा धीरा पदैरनुग्मन्नुप त्वा सीदन् विश्वे यजत्राः" (ऋ० १।६५।१) इति । पश्वा=पशुना जीवेन सह "सयुजा सखाया" (ऋ० १।१६४।२०) इति श्रुत्यन्तरात् । तायुं न=चौरमिव गुहा-चतन्तम्=बुद्धिमधिवसन्तं नमो वहन्तम्=नमस्कारं स्वीकुर्वन्तं नमो युजानम्=नमस्करणे प्रेरयन्तं "मा नमस्कु" रित्यादिवाक्यात् । पशुपति सजोषा धीराः=भक्ता विद्वांसः पदैः=तत्वमस्यादिपदैः अनुग्मन्=अनु-गच्छन्ति । अथ चैवं तं विश्वे=सर्वे यजत्राः=उपासका उपसीदन्=प्राप्नुवन्ति तमित्यर्थः । "विदन्तीमत्र नरो धियं धा हृदा" (ऋ० १।६७।३) इति च । धियं धाः=बुद्धिमन्तो नराः अत्र=बुद्धिगुहायां हृदा=अग्रया बुद्ध्या ईम्=इमं परमात्मानं जानन्तीत्यर्थः ॥७४॥

मू० ऐसी मात्रा लै पहिरे कोय,
आवागमन मिटावे सोय ॥७५॥

इतिश्रीमदुदासीनसम्प्रदायाचार्यभगवत्पाद-
श्रीश्रीचन्द्राचार्यविरचितं मात्रा-
शास्त्रं सम्पूर्णम् ॥

—०*०—०*०—

सं० अ० ईदृशीं मात्रां परिदधीत यः कोपि, आवागमने नितरां नाशयेत्सः ॥ ७५ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

इतिश्रीमदुदासीनपञ्चायत्यन्तारसंस्थापकाचार्य-
श्रीनिर्वाणप्रियतमदासकृतो
मात्रानुवादः समाप्तः ॥

——०—०——

भा० प्र० यः श्रुत्वाधीत्य मत्वेदङ्-मात्रां परिदधीत तु ।
नैजरूपमवाप्नोऽसौ, यानायाने निषेधतु ॥ १११ ॥

श्रु० सं० माहात्म्यमाहुः ईद्दशीत्यादि । ईद्दशीम्=पूर्वोक्तां सप्रकारां मात्राम्=मायास्त्रायत इति मात्रा तां ब्रह्मविद्यामिति यावत् । यः कोऽप्यधिकारी हृदि धारयेत्स जन्ममरणप्रवाहं विच्छेद्य ब्रह्मरूपो भवेदिति भावः । "न पुनरावर्तते" (प्र० १।१०) । "सतु तत्पदमाप्नोति यस्माद्भूयो न जयते" (क० ३।८) । " ब्रह्मैव सन् ब्रह्माप्येति" (बृ० ४।४।६) यद्गत्वा न निवर्तन्ते तद्धाम परम मम" (गी० १५।६) इत्यादीन्यत्र प्रमाणान्यतिरोहितार्थानि । व्याचष्टे य इत्यादिना । सुप्रसन्नम् ॥ ७५ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

सदर्थरत्नसम्पूर्णा, भावप्रभासमुज्ज्वला ।
भूषयन्ती श्रुतिस्वान्ते, मात्रा गुरुप्रसादतु ॥ ११२ ॥

एकैकशो नैकरहस्यभाञ्जि,
श्रौतार्थसन्दोहसुधान्विता न ।
आकाङ्क्षयन्त्राणीमधुर्माश्रितानि,
चषन्तु सूत्राण्यपवर्गदानि ॥ ११३ ॥

श्रु० सं०, श्लेषेण मात्रां स्तौति सदर्थेत्यादि । "मात्रा कर्णभूषायां वित्ते माने परिच्छदे"—इतिमेदिनीवाक्यात्कर्णालङ्कारेऽपि मात्राशब्दो वर्तते । अस्मिन्पक्षे सदर्थरत्नसम्पूर्णा=सदर्थैरुत्तममूल्यै रत्नैः गुम्फिता । भावप्रभासमुज्ज्वला=तेजोऽभावेऽन्धकारे स्वप्रभया देदीप्यमाना । श्रुतिस्वान्ते=कस्याश्चित्कर्णं कस्याश्चित्स्वान्तं च भूषयन्ती सती मात्रा=श्रवोभूषा गुरुप्रसादतु=गुरुश्चासौ प्रसादः स इवाचरत्वित्यर्थः । ग्रन्थपक्षे तु सदर्थरत्नसम्पूर्णा=उत्तमैः पदार्थरत्नैः सम्पूर्णा । भावप्रभासमुज्ज्वला=भावयात्मनः प्रभया समुज्ज्वलात्मतत्वप्रकाशिकेति यावत् । श्रुतिस्वान्ते=श्रवणमननविधिना मुमुक्षूणां श्रोत्रं मानसं च भूषयन्तीयं मात्रा=श्रीमदाचार्योपदेशरूपेयं पुस्तिका गुरुप्रसादतु=आचार्यप्रसादवाचरतु शीघ्रं बोधप्रदा भवत्वित्यर्थः ॥ ११ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

न विस्मरेद्विष्णुसुरूपराम,
स्वकीयरूपे रमता सदायम् ।
दयान्वितस्सद्गुरुराम आख्यद्,
रामस्वरूपेतिसमाख्यया यम ॥ ११४ ॥

श्रीदेवयानाख्यकपद्धतिर्यो,
लतालयग्रामकृताधिवासः ।
सोऽहं व्यधां श्रीशशिभावबोधीं,
प्रसादिनीं नाम मनःप्रसादीम् ॥ ११५ ॥

श्रु० सं०ग्रन्थं ग्राहयति एकैकेत्यादि । प्रत्येकं सूत्राण्यनेकानि रहस्यान्युद्घाटयन्ति, विशकलितान्वेदार्थान् संगृह्णन्ति, स्वाकाङ्क्षायोग्यसन्निधेयाभिप्रेतार्थपदैः संयुज्यापवर्गमार्गं निपुणतरमुपपादयन्तीतिग्राह्याणीमानि मुमुक्षुभिरित्याशयः ॥ ११३ ॥

गुरुभ्रातर स्मरन्स्व मनाक् परिचापयति न विस्मरेदित्यादिद्वाभ्याम् । विष्णुसुरूपरामम् = वैद्यवरपण्डितविष्णुदासेतिप्रसिद्धम् । "दयाराम"—इतिप्रख्याप्रख्यातः सद्गुरुर्यं 'रामस्वरूप'—इति समाख्ययाख्यद्, यो देवयानाख्यकपद्धतिः=देवयानाख्यका पद्धतिर्यस्य, यश्च लतालयग्रामकृताधिवासः सोऽहं श्रीशशिभावबोधीम्=श्रीचन्द्राचार्याभिप्रायावगमनीं भावप्रसादिन्यभिधां टीकां व्यधाम्=अकार्षमित्यर्थः ॥ ११४,११५ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

LIBRARY
Jangamwadi Math, Varanasi
ACC No. ....

दिग्दर्शिकेयं तु कृतिर्मदीया,
व्याख्यां विदध्यु बृंहतीं बुधेन्द्राः।
गुरूपदेशेन दिशः प्रकाश्य,
लभ्योऽविलम्बं स्वगुरुप्रसादः ॥११६॥

भूभृन्नभोऽयोमदृगङ्कितेऽब्दे,
श्री वैक्रमे चैत्रवलक्षपक्षे ।
कुम्भे सटीकामयकार्पि मात्रा,
समागतोदासिसुधीसमक्षे ॥११७॥

जीवस्य कार्ये क्व च न प्रमादः,
त्रुटिस्ततोऽत्रेति न मन्यते न ।
क्षमाऽस्ति धर्मो विदुषामनेन,
न क्षम्यते नेति न मन्यते न ॥ ११८॥

अन्यानपि विदुषो मात्राव्याख्यानाय प्रवर्तयति दिग्दर्शिकेत्यादि । प्रसन्नं पद्यम् ॥ ११६ ॥

टीकानिर्माणसमयमाह भूभृदित्यादि । सप्तोत्तरद्विसहस्रमिते — (२००७) वैक्रमे वर्षे चैत्रमासे वलक्षपक्षे= शुक्लपक्षे हरिद्वारकुम्भपर्वणि समागतानामुदासीनमुनीनां समक्षे मयेयं टीकाऽऽर्पीत्यन्वयार्थः ॥ ११६ ॥

त्रुटिं क्षमापयति जीवस्येत्यादि ॥ ११८ ॥

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

LIBRARY
Jangamwadi Math, Varanasi
ACC No. 4033

यथामत्यात्मतर्षो मे, शमितस्तु चिरन्तनः ।
सशमयन्तु सन्तस्तं, त्रुटिपूर्त्येदमर्थ्यते ।। ११६ ।।

इतिश्रीमदुदासीनपरमहंसपरिव्राजका-
चार्यपण्डितप्रकाण्डसम्पादकश्रीरामस्वरूप-
निर्मिता भावप्रसादिनी
समाप्तिं गता

—:०:—

श्रु सं० सन्तः प्रार्थ्यन्ते यथेत्यादि । यथामति मे=मया चिरन्तन आत्म तर्षः=स्वतृषा शमितः=भावप्रसादिन्या प्रसादितां मात्रां गां सन्दुह्य पय यानेन कथञ्चिन्निवर्तितः । सन्तस्तु त्रुटिपूर्त्या =न्यूनतापूर्त्या ऽवेलापूर वा संशमयन्तु=पिपासां सम्यक् शमयन्त्विति प्रार्थ्यत इत्यर्थ ।। ११६ ।। इति शम् ।।

येषां कृपाकणेनैव, श्रुतिसंवादिनी कृता ।
तेभ्योग्रयेभ्य ऋषिभ्यो मे, पथिकृद्भ्य इदं नमः ।।

इतिपरमहंसपरिव्राजकाचार्योदासीनवर्य-
श्रीमदृषिरामशिष्ययोगीन्द्र
संग्रहीता श्रुतिसंवादिनी
समाप्ता

इतिमात्राशास्त्रम्

4033
28328
SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY,
Jangamwadi Math, VARANASI,
Acc No.

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative

कनखलस्थटेम्पलप्रेसनाम्नि
यन्त्रालये मुद्रितम् ।

CC-O. Jangamwadi Math Collection, Varanasi. An eGangotri Initiative